न्त्वा तव वधिस्त्वयं॥ तद्भूमिजा तसीतायां शुभां कन्यां समुत्थितां॥ लेभे राजा मुदा युक्तः सर्वलक्षणसंयुतां॥ तस्यां तु जातमात्रायां. पृथिव्यन्तर्हिता स्वयं
जगाद वचनं वेदे गौतमं नारदं नृपं॥ ॥पृथिव्युवाच॥ एषा सुता मया दत्ता. तव राजन्मनोहरा॥ एषा गृहाण सुभगां. कुलद्वयप्रभावहां॥
अनया मे महाभागा संतनोदेतु भूतया॥ क्षयं यास्यति भारार्त्तिं मोचयिष्यामि दारुणां॥ रावणाद्या महावीराः कुंभकर्णादयोऽपरे॥ नाशं यास्यः
न्ति दुर्द्धर्षाः कृते स्या राक्षसापरे॥ त्वं च मोदं दुराधर्ष. ङङि कृतिजं नृप॥ अवाप्स्यसि सुराणां च. पितॄणां मृणशोधनं॥ किं त्वेकः समयः का
र्यस्त्वया मम नरोत्तम॥ तमहं त्वेप्रवक्ष्यामि. पुरो नारदगौतमे॥ निहते रावणे वीरे. भारार्त्तिरहिता सुखं॥ सुपुत्रं जनयिष्यामि. यज्ञभूमावहन्तव॥
तं पुत्रवत्पालयिता. भवान्नृपतिसत्तम॥ यावद्यतीतवाल्यः स. भविता तनयो मम॥ व्यतीतवाल्यं तमहं. पालयिष्ये स्वयं नृप॥ तस्य स्यान्मातु
षो भावो. यथा त्वं तत्करिष्यसि॥ ॥मार्कण्डेय उवाच॥ इति पृथिव्या वचनं श्रुत्वा. राजा तदा मुदा॥ प्रणम्य पृथिवीं प्राह. सामन्नासजन
कात्मजां॥ ॥राजोवाच॥ यत्त्वं ब्रूषे जगद्धात्रि. करिष्ये तद्वचस्तव॥ ममापीष्टं प्रयच्छस्व. प्रसीद परमेश्वरि॥ देवि प्रत्यक्षतो रूपं. द्रष्टुमि
च्छाम्यहं तव॥ शक्तिस्त्वं लोकजननी. त्वां नमामि प्रसीद मे॥ इति तस्य वचः श्रुत्वा. जनकस्य तदा क्षितिः॥ मुनीनां सन्निधौ रूपं. दर्शयामास
भूभृते॥ नीलोत्पलदलश्यामा. अक्षमाला बुधारिणी॥ बाहुयुग्मेन शुभ्रेण. मृणालायतशोभिना॥ सुन्दरीं लोकधात्रीं तां. दृष्ट्वा शश्व नृपो
ऽनमत्॥ ततः सा पृथिवी देवी. सीतां जातां नृपात्मजां॥ करेण शश्वत्संस्पृश्य. वचनं चेदमब्रवीत्॥ इयन्ते मानुषी भाव. मवाप्स्यति जगन्मुदः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तवपुत्रीनृपश्रेष्ठ.समयंप्रतिपालय॥ ॥मार्कण्डेयउवाच॥इत्युक्त्वापृथिवीदेवी.राजानंजनकाह्वयं॥संभाष्यनारदादींस्तां.स्तत्रैवा
न्तरधीयत॥जनकोपिसुतांलब्ध्वा.सर्वलक्षणशालिनीं॥मुमुदेयंतथाप्राप्य.मुदितःस्वगृहंययौ॥ततःकालेतुसंप्राप्ते.रावणेराक्षसेहते
॥मानुषेणस्वरूपेण.विष्णुनाप्रभविष्णुना॥गत्वाविदेहराजस्य.यज्ञभूमिंतदाक्षितिः॥सुषुवेतनयंवीरं.यत्रसीतापुराभवत्॥जातेपुत्रे
तदादेवी.जगद्धात्रीजगत्प्रभुं॥सस्मारसमयेविष्णुं.स्मरन्तीसमयंपुरा॥स्मृतमात्रस्तदादेवःसमयंप्रतिपालयन्॥क्षितेर्यत्रसुतोजात.स्तत्रप्रादु
र्बभूवह॥प्रादुर्भूतंतदादेवी.प्रणम्यपरमेश्वरं॥संस्तूयसूनुंतंशश्व.दिदमाहजगत्प्रभुं॥ ॥पृथिव्युवाच॥एषतेतनयोजातःसुकुमारोमहा
प्रभुः॥संस्मरसमयंपूर्वं.त्वमेनंप्रतिपालय॥ ॥भगवानुवाच॥अयन्तेतनयोदेवि.महाबलपराक्रमः॥भवितामानुषंभावं.तत्यजानासुवि
रंबुधः॥यावन्मानुषभावन्ते.तनयोभावयिष्यति॥तावत्कल्याणमाप्नूत्वा.चिरंराज्यंकरिष्यति॥त्यक्त्वामानुषभावन्तु.यदाचायंविचेष्टते
॥तदातुनास्यसुचिरं.जीवितंसंभविष्यति॥संप्राप्तेषोडशेवर्षे.राज्यमासादयिष्यति॥धनरत्नगजैश्वर्य.युक्तोयंरथसंचयैः॥आसाद्यमह
तींनित्यां.श्रियंभोक्ष्यतीवीर्यवान्॥यस्मिन्यस्मिंयुगेभावो.योयोभवतिवैनृणां॥तंतंभावंतथैवेष.करिष्यतितथाकृतः॥एतस्यनिभृतंराज्यं
यत्प्राग्ज्योतिषसंज्ञकं॥पुरन्तत्रचिरंशास्ता.राज्यमेषसुतस्तव॥इत्युक्त्वापृथिवींविष्णुःसमाभाष्यजगत्पतिः॥दृश्यमानस्तयाक्षिप्रं.तत्रैवान्त
र्दधेप्रभुः॥प्रसूयपृथिवीपुत्रं.मध्यरात्रेमहाद्युतिः॥जनकंज्ञापयामास.रहस्यंपूर्वमीरितं॥विदेहराजोज्ञात्वैव.पृथिवीजनितंसुतं॥तदैव

यज्ञवाटस्य. राज्ञो वागान्कृतक्रियः॥ गच्छन्तं यज्ञवाटन्तं दृष्ट्वा सर्वसहा तदा॥ नोक्त्वा किंचन तं शम्भुः दत्त्वा नंगता नृपं॥ अथ गते न तदा तत्र वि
देहाधिपतिः सुतं॥ धरायां ददृशे कान्त्या. चन्द्रार्कज्वलनोपमं॥ रुदन्तं वक्रशश्रुन्दं. चलद्धस्तपदद्वयं॥ वपुष्मन्तं श्रिया दीप्तं. कार्त्तिकेयमिवाप
रं॥ उज्जहसस्मदन्बालो. यज्ञभूमीव्यतीत्य च॥ कियद्दूरं जगामाशु. तानशायी महाद्युतिः॥ मानुषस्य शिरस्तत्र. पृतस्य प्राप्य बालकः॥ स्वशिर
स्तत्र विन्यस्य. रुदन्नस्थौ क्षणं तदा॥ ततो विदेहराजोपि. मार्गमाणः क्षितेः सुतं॥ व्यतीत्य यज्ञभूमीन्तु. मासमात्रं जनात्वहिः॥ आसाद्य बालकं
दीप्तं वदीन्नमीवपावकं॥ कान्त्या चन्द्रमसस्तुल्यं. तेजोभिर्भास्करोपमं॥ शरमध्यगतं पूर्वं. पावकिं पावकोयथा॥ स्वयं जग्राह तं राजा.
पृथिव्याः समयं स्मरन्॥ तं गृह्णन्तत्र च्छिरोदेशे. ददृशे मानुषं शिरः॥ सा शंसचाचिरं शीर्षं. मानुषं गोतमायसः॥ अथ बालं समादाय.
प्रविश्यान्तःपुरं स्वकं॥ महिष्यै कथयामास. प्राप्तं पुत्रं गुरूपमं॥ सा तं दृष्ट्वा विशाला [illegible] सं. सिंहस्कन्धं महाभुजं॥ विस्तीर्णहृ
दयं कान्तं. नीलोत्पलदलच्छविं॥ मुमोद पालनियोयं. त्वयेति न्यगदन्नृपः॥ तां राजा [illegible] तः प्राह. पुत्रोयं मम सुंदरि॥ यज्ञभू
मौ समुत्पन्नः स्वच्छंदं पाल्यतामयं॥ यत्पृथिव्या रहः प्रोक्तं. न तद्देव्यै न्यवेदयत्॥ सत्यसंधो नृपश्रेष्ठः प्रियायामपि भाषितं॥ मम
सुतसुतवंशान् पालयित्री धरेयमिति नरपतिवर्यो मोदवांस्तं हृदि देशा॥ सुरतनयसमानं पुत्रमासाद्य देवि. जितरिपुरि
ति हि नः स्यादयं चैत्यमोदेत्॥ ॥इति कालिकापुराणे सप्तत्रिंशोऽध्यायः॥३७॥ ॥मार्कण्डेय उवाच॥ अथ तस्य नृपश्रेष्ठो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

का॰पु॰ गौतमेन महर्षिणा॥ संस्कारं कारयामास. विधिनामानुयोगेन तु॥ नरशीर्षेथ सुशिरो. निधाय स्थिरकान्यपतः॥ तस्मात्तस्य मुनिश्रेष्ठो
८८ नरकं नाम वैद्यधात्॥ अपरानू बालसंस्कारान्. क्षात्रेण विधिना मुनिः॥ केशान्तेवधि संचक्रे. ऋग्यजुःसाममंत्रकैः॥ ववृधे तस्य स
दने. नरको नाम भूसुतः॥ दिनं दिनं धृतान्यश्रीः शरदीव निशाकरः॥ स राजा तं सदा भावैर्मानुषैर्यो जयन्स्वयं॥ गौतमस्य सुतेनाथ
शतानंदेन धीमता॥ शाहयामास तं नित्यं. क्षात्रभावेन मानुषं॥ तथैव पृथिवी देवी. धात्री वेशेन तं सुतं॥ नियतं शाहयामास. मानु
षं चरितं सुभं॥ यदैव पुरुतुत्पन्न. स्तदैव पृथिवी स्वयं॥ मायामानुषरूपेण. राजान्तःपुरमाविशत्॥ प्रविश्य तत्र सा देवी. नृपस्यानुमते
ऽभवत्॥ धात्री तस्याद्विजश्रेष्ठाः कान्यायन्याश्च वस्थया॥ यावत्षोडश वर्षाणि. तस्य बालस्य भाविनी॥ तावत्स्वयं पालयन्ती. शीक्ष्यामास
३५ सा स्वयं॥ स वर्द्धमानो दिनं. नरकः पृथिवीसुतः॥ अत्यक्रमे सुतान्सर्वान्. जनकस्य महात्मनः॥ शरीरेणाथ रूपेण. वीर्येण बलवन्नया॥
धनुषा गदया वीरो. व्यत्यक्रामं नृपात्मजान्॥ स शास्त्रवादकुशलो. धनुर्वेदेव कोविदः॥ वर्षैः षोडशभिर्न्नूतो. वीरैरन्यैर्दुरासदः॥ विदेहा
धिपतिर्दृष्ट्वा. महाबलपराक्रमं॥ ततो न्यूनांश्च पुत्रांश्च नातिहृष्टमना भवत्॥ विचिंत्य मम पुत्रान्सो. राज्यमेष ग्रहिष्यति॥ काले प्रा
प्ते महावीरो. मतिः तस्माद्भवत्तदा॥ अन्तःपुरे यदा पुत्रान्सर्वान्रमयते नृपः॥ तदा तु नरकं वीक्ष्य. हर्षं प्राप्नोति नाधिकं॥ तस्य तद्बु राम
ध्वे देवी. नृपस्याथ वसुंधरा॥ महिषी विस्मयं चक्रे. तस्मिन्काले तु भूभृतः॥ अथैकदा महादेवी जनकस्य महात्मनः॥ पप्रच्छ नृपतिश्रेष्ठं. विद ८८

विदेहाधिपतिंपतिं॥नाथपृच्छामितेकिंचि.द्रहस्यंयद्धिनोतव॥तदामांतद्वदस्वत्वं.कृपाचेद्विद्यतेमयि॥यद्दैवंतनयाःसर्वे.विहरन्तिपुर
न्तव॥तद्दैवनरकंहत्वा.विशीर्णइवलक्ष्यसे॥तन्मेरात्रिदिवंनाथ.विस्मयःप्रतिवर्द्धते॥संशयश्चभयंचैव.नजहातिचमांसदा॥रूपवान्
वीर्य्यवान्नेव.नयेचविनयेतथा॥कुशलःप्रतिबुद्धश्च.पुत्रस्तवमहाबलः॥नसमाजयसेकस्मा.त्पुत्रमन्यैर्दुरासदं॥तदहंज्ञातुमिच्छामि
यदितथ्यंवदस्वमे॥ ॥मार्कण्डेयउवाच॥इतितस्यावचःश्रुत्वा.प्रियायाःपृथिवीपतिः॥तूष्णींभूत्वाक्षणंदेवी.मिदंवचनमब्रवीत्॥ ॥
राजोवाच॥कथयिष्येप्रियेतत्त्वं.यत्पृष्टोहंत्वयाधुना॥मासत्रयेव्यतीतेतु.समयंप्रतिपालय॥निगूढःकश्चिदत्रास्ति.देवस्यसमयोम
म॥तेनाधुनानकिंचित्ते.कथयिष्यामितद्रहः॥ ॥मार्कण्डेयउवाच॥राज्ञोह्ययंसभार्य्यस्य.संवादोऽभवदन्तिके॥मानुषीपृथिवीधा
त्री.तंशुश्रावयदातदा॥श्रुत्वातयोस्तुसंवादंमहिषीभूपयोःक्षितिः॥मासत्रयेणसमयं.दत्तंदैव्येधराभृता॥तत्कालविमनस्कंच.भूपं
नरकसंज्ञया॥त्रिभिर्मासैर्व्यतीतेस्मा.दस्यषोडशवत्सरः॥ततोनृपोमहिष्यांतु.कथयिष्यतितद्रहः॥ततोममरहस्यंतु.विदितंसंभवि
ष्यति॥चिंतयित्वेतिसादेवी.जगद्धात्रीसुतंप्रति॥निश्चित्यैतत्तदाकृत्यं.प्राप्तकालमवेक्षत॥ततोरहसिभूपंतंसमासाद्यसगौतमं॥इ
दमाहजगद्धात्री.स्वपुत्रार्थेयशस्विनी॥योमयासमयोदत्तःपालितःसत्वयानघ॥पुत्रश्चपालितोमेयं.नरकोविनयैर्युतः॥सप्रा
प्तयौवनःपुत्रो.योजितश्चत्वयानयैः॥तवप्रसादात्पुत्रोमे.सुखीवृद्धोगृहेतव॥तमहंपूर्वसमया.न्नयिष्यामिस्वमात्मजं॥अनुजानी

दपिकृवाच २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का.पु.
८९

हिमद्रन्ते.नरकस्य गतिं प्रति॥ रक्षितव्यश्च भवता.समयः स पुरोधसा॥ कृत्नमेवत्नयिष्यामि.नृपते मा व्यथां कृथाः॥ ॥मार्कण्डेय उवाच
॥इत्युक्त्वा जगतां धात्री.विदेहाधिपतिं नृपं॥ तत्रैव पश्यतां तेषां.मन्त्रर्जोनमुपागमत्॥ नृपोपि तस्यास्तद्वाक्यं.मंगीकृत्य क्षितिं प्रति॥ त
स्याश्रत्य क्षतः स्थानं.जगाम स पुरोहितः॥ अथैकदा धरा देवी.मायामानुषरूपिणी॥ उपांशु नरकं प्राह.धात्रीतस्य महात्मनः॥ त्वया सह
मया वाहो.गंगां गंतुं मनो मम॥ यदि त्वं यास्यि यास्यामि.रथेनाद्यैव पुत्रक॥ ॥नरक उवाच॥ नपितुर्वचनं यास्ये.विना मातस्त्वया समं
॥अवज्ञाय महाराजं.करिष्यामि न वेप्सितं॥ गुरुं च तनयं तस्य.शतानंदं द्विजोत्तमं॥ अनुज्ञाप्य रथेनाहं.यास्ये गंगां सह त्वया॥ ॥
धात्र्युवाच॥ न ते पितायं जनको.यः सर्व्व जगतां प्रभुः॥ स ते पितानुगंगायां.पश्य गत्वा मया सह॥ अयं पिता पालकस्ते.न वाक्यं स
प्रदास्यति॥ यस्ते वर्द्धयिता तात.स्त्वमातादयपुत्रक॥ अत्रयच्छरहस्यं तु.गंगायामेव पुत्रक॥ कथयिष्याम्यहं सर्व्वं.रहो मे गोप्य
थाम वेत्॥ ॥मार्कण्डेय उवाच॥ जातसंप्रत्ययो धात्र्या.वचनान्नकैरस्तथा॥ विहाय यानं कुन्तेन.पद्भ्यां गंगां ययौ नदी॥ अथ ग
गां समासाद्य.संस्नाप्य विधिवत्सुतं॥ आत्मानं दर्शयामास.पृथिवी स्वसुताय वै॥ मायामानुषमृत्तिं स्वां.विहाय जगतां प्रसूः॥ नीलोत्पः
लदलश्यामं.सर्व्वलक्षणसंयुतं॥ स द्वांगसुन्दरं वाहं.नानालंकारभूषितं॥ पुत्राय दर्शयामास.नरकाय वसुंधरा॥ कथामेतां च पू
र्व्वस्मि.नुद्भूतां पृथिवी तदा॥ कथयामास पुत्राय.प्रतीति ज्ञायते नयं॥ मम गर्भे यथा पुत्र.वर्द्धसेत्वं दिने दिने॥ ब्रह्मादयस्तदा देवा

रामः
८९

Domain. Digitization by eGangotri. Funding: MDF

आलोक्य स्वयमेवते॥ महिनीक्षितिसंजातः पुत्रो विष्णोर्महात्मनः॥ इति चिन्तापरा देवाः कुमंत्रं चक्रिरे तदा॥ अयन्नोन्यघ्नतां गर्भोऽस्मै तिष्ठत्वयं स
दा॥ ज्ञातो मम भवान्गर्भे सुवह्नियुगान्यथा॥ अवसत्वसुरान्पुत्र. देवतानां कृकृत्यथा॥ मृतकल्पा भवम्यहं. भवतो धारणात्सुत॥ ततोहं शरणं
याता. भगवंतं सनातनं॥ नारायणस्य वाक्यात्तु. भवानुत्पन्नवान्सुतः॥ इति सत्यं मम वचः पुत्र जानीहि निश्चितं॥ अथया वन्नपुत्रस्य. विस्म
यः समपद्यतः॥ तावदेव स्वयं देवी. प्रोवे पुत्रमिदं वचः॥ अहं ते जननी भद्र. मया जातोसि पुत्रक॥ पृथिव्यहं जगद्धात्री. यद्रूपं मृण्मयं त्विदं॥
पिता तव महावाहो. प्रभुर्न्नारायणोव्ययः॥ अच्युतो जगतां धाता. महात्मा सूकरात्मधृक्॥ तेनाहितस्त्वं मद्गर्भे. सुचिरं त्वं पुरा वसः॥ संप्राप्ते समये
जातः पालितश्चाहमूर्तृता॥ ॥मार्कण्डेय उवाच॥ ॥अथ तस्या वचः श्रुत्वा. हर्षशोकाकुलस्तथा॥ नरकः पृथिवीं देवी. मिदमाह धनुर्द्धर
॥ न माता विदिता पूर्वं. माताहमिति भाषसे॥ विष्णुः पितेति च वचो. न पिता विदितो मम॥ जानामि पितरं चाहं. विदेहाधिपतिं नृपम्॥ तस्य
भार्यां सुमत्याख्यां. अहं जानामि मातरं॥ भ्रातरस्तत्सुताः सर्वे. सीता मे भगिनी शुभा॥ सुमत्या मम माते ति. लोको जानाति सन्ततं॥ कात्याय
नी च धात्री मे. याः श्रुते ष कृता त्वया॥ एतत्सर्वं त्वया मिथ्या. दर्शितं मम सांप्रतं॥ यथा तवाहं तनयः सत्यमाख्याहि तन्मम॥ ॥मार्कण्डेय
उवाच॥ ॥पुत्रस्य वचनं चेति. श्रुत्वा सर्वंसहा तदा॥ सर्वं तं पूर्ववृत्तान्तं. तनयाय न्यवेदयत्॥ यथा महिन्याः संभोगो वराहस्याभवत्पुरा॥ यथा
गर्भे धृतो देवैः. येन वा कारणेन सः॥ यथा च गर्भदुःखार्त्ता. माधवं शरणं गता॥ यथा तेन प्रदत्तश्च. समयो जननं प्रति॥ यथा विदेहराजस्य. य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्ञभूमावसूयत॥ विदेहराजेन समं याद्दशं समयो भवत्॥ यथा मानुषरूपेण धात्रिसा समपद्यत॥ तत्सर्वं कथयामास नरकाय महात्मने॥ ॥
ऋषय ऊचुः॥ ॥किमर्थं समयो दत्तो विष्णुना प्रभविष्णुना॥ निहते रावणे वीरे रामेण सुमहात्मना॥ भविष्यंति सुतास्ते वै तत्र नः संशयो महान्॥
एतत्वं संशयं छिंधि गुरो शास्त्रासि नः सदा॥ ॥मार्कंडेय उवाच॥ भारात्तारावणादीनां पृथिवीमांसभोगिनां॥ अधोगता योजनानी पंचैव द्विज
सत्तमाः॥ अयं वराहवीर्येण जातो गर्भेक्षितेः पुनः॥ असावपि महाराजो दशग्रीवो यथा भवत्॥ अधो यास्यति भारार्त्ता सा तीव पृथिवी त्विति
॥समयं दत्तवान्विष्णु रावणे निहते सति॥ धरायै भार विहित्तुं वीजे न द्विजसत्तमाः॥ अथैतां पृथिवीं प्राह नरकः पुनरेव हि॥ पृथिव्या वचनं श्रु
त्वा स्वल्पसंशयसंयुतं॥ यद्येवं मे पिता विष्णु मोता त्वं पृथिवी शुभे॥ आगच्छतु जगन्नाथो ममैवाभ्युपपत्तये॥ स एव सर्वलोकेशो यदि मां भाषते
ऽच्युतः॥ पिताहन्ते त्वियं माता श्रद्दधे तदहं शुभे॥ त्वया मानुषरूपेण धात्र्याहं प्रतिपालितः॥ तद्रुपं द्रष्टुमिच्छामि यदि ते रूपमीदृशं॥ त्वत्पूर्व
रूपं द्रष्टास्मि वचनात्वं जगद्गुरोः॥ जातश्रद्धो महाभागे स्थास्यामि समये तव॥ ॥मार्कंडेय उवाच॥ पुत्रस्य वचनं श्रुत्वा पृथिवी प्रथमं त
दा॥ मायामानुषरूपं तत्यक्ति जग्राह तत्पुरा॥ तथा कात्यायनीरूपं येन रूपेण पालितः॥ नरकं सा नुतं कृत्वा तत्याज पृथिवी तनुं॥ अ
थ दृष्ट्वैव नरको धात्रीं कात्यायनीं तदा॥ पप्रच्छ पूर्ववृत्तांतं यद्वृत्तं नृपमंदिरे॥ सा तथा कथयामास यथा स प्रतिपालितः॥ यद वृत्तं पूर्वं तो
गेहे नृपस्य जनकस्य तु॥ जातसंप्रत्ययस्तत्र नरकः समपद्यत॥ पृथिवी च तु नर्द्देवी रूपं स्वं जगृहे तदा॥ अथ सस्मार पृथिवी जगन्नाथं ह

रिं प्रभुं॥ समये पूर्वविहिते. प्रणम्य शिरसा मुहुः॥ स्मृतमात्रस्तदा क्षित्या. माधवो गरुडध्वजः॥ प्रसन्नो जगतान्नाथः प्रत्यक्षत्वं गतस्तदा॥ तं दृष्ट्वा पृथि
वी देवी. देवं गरुडवाहनं॥ नीलोत्पलदलश्यामं शंखचक्रगदाधरं॥ पीताम्बरं जगन्नाथं. श्रीवत्सोरस्कमव्ययं॥ प्रणनाम महाभक्त्या. पस्पर्श
शिरसा महीं॥ परमेश जगन्नाथ. जगत्कारणकारण॥ प्रसीदेतीव चश्चापि तदा प्रोचे जगत्प्रभुः॥ नरकस्तु हरिं दृष्ट्वा. निमील्य नयनद्वयं
।तत्तेजसाभिभूतस्तु. तदाभूमावुपाविशत्॥ उपविष्टे तदा देवी. तनये नरकाह्वये॥ प्रसादयामास तदा. पुत्रार्थे वरवर्णिनी॥ प्रसादयमा
नो धरया. हरिर्न्नारायणोऽव्ययः॥ शंखाग्रेण तदा पुत्रं. पस्पर्श नरकाह्वयं॥ स्पृष्टमात्रोऽथ हरिणा. नरको भूत्सदर्शनः॥ हृष्टश्चोत्साह
वांश्चैव. वलवान्समपद्यत॥ तत उत्थाय नरको. हरिं नारायणं प्रभुं॥ प्रणम्य भक्त्या गोविंदं साष्टांगं च मुहुर्मुहुः॥ न नाम पृथिवीवीरो. जा
तसंप्रत्ययस्तदा॥ प्रणम्य च महाभागां. भक्त्या परमया सुतः॥ प्रांजलिः पुरतस्तस्थौ. नोक्तं किंचन वै भिया॥ ततस्तदर्थे पृथिवी. माधवं स
मयाचत॥ प्रसीद देवदेवेश. समयं प्रतिपालय॥ त्वयायं समयो दत्तो. मम सर्व्वजगत्पते॥ एतदर्थे प्रतिज्ञातं. यत्नात्त्वं प्रतिपालय॥ ॥
भगवानुवाच॥ भवतीयत्त्वपुत्रार्थे मामयाचत्सुरामया॥ तत्सर्व्वं तव दत्तं वै. राज्यं च भुज्यते भुवं॥ इत्युक्त्वा भगवान्विष्णु. रादाय नरका
ह्वयं॥ सह पृथिव्या गंगायां. मम ज्जगतां पतिः॥ निमज्ज्य क्षणमात्रेण. प्राग्ज्योतिषपुरं गतः॥ मध्ये गां कामरूपस्य. कामाख्याय त्र नायि
का॥ स च देशः स्वराज्यार्थे. पूर्वं गुप्तश्च शंभुना॥ किरातैर्वलिभिः क्रूरै. र्यज्ञैरपि च वासितः॥ तत्कालं तं भनिभांस्तत्र. किरातान्ज्ञानवर्ज्जिता

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्॥ अनर्थमुंडितान्नाद्य मांसाशानेकतत्परान्॥ ददर्श कुपितो नूनं विप्लुर्दृष्ट्वा द्विजर्षभाः॥ तेषामधिपतिस्तत्र घाटको नाम वीर्यवान्
॥ स्कन्नस्तं मतिमत्कं गः प्रदीप्त इव पावकः॥ स क्रोधीव तुरंगेण वलेन महता वृतः॥ आससाद जगन्नाथं नरकं च महावलं॥ आ
माशरवर्षेण ववर्ष प्रभुमव्ययं॥ किरातैः सहितो राजा घाटकाख्यः किरातराट्॥ माधवोपि तदा पुत्रं नरकं वीर्यवत्तरं॥ प्रेष
यामास युद्धाय किरातनृपतेस्तदा॥ नरको धनुरादाय सहितैर्वलवत्तरैः॥ युयुधे सुचिरं तत्र शस्त्रास्त्रैर्वहुधेरितैः॥ ततो सौ भ
ल्लमादाय योजयित्वा धनुर्गुणे॥ शिरः किराततराजस्य चिच्छेद नरको वली॥ मुख्यान् मुख्यान् किरातांश्च वहून् सेनाधिपांस्त
दा॥ जघान कुपितो वीरः केशरीव मतंगजान्॥ हतेथ नृपतौ केचित् पलायनपराभवन्॥ किराताः केचन पुनर्नरकं शरणं ग
ता॥ निहत्य युध्यमानांश्च संरक्ष शरणागतान्॥ नरकः पितरं गत्वा प्रणम्याथ निवेदयत्॥ हतस्तत्र किरातानामधिपो घा
टको मया॥ सेनाधिपाश्च तस्यान्ये किमन्यत्करवाण्यहं॥ ॥भगवानुवाच॥ किरातान् जहि याव त्वं देवीदिक्करवासिनी॥
पलायमानान्विद्राव्य पालयन् शरणागतान्॥ ॥मार्कंडेय उवाच॥ ततः स नरको वीरः समारुह्य सितं गजं॥ चतुर्दन्तं म
हाकायं किराताधिपवाहनं॥ ऐरावतसमं वीर्ये वेगेन गरुडोपमं॥ किरातान्द्रावयामास यावद्दिक्करवासिनी॥ पितरं
पुनरागत्य वचनं वेदमब्रुवीत्॥ विद्राविताः किरातास्ते सागरांतं समाश्रिताः॥ निहतो घाटकाख्यश्च किराताधिपतिर्म

हान्॥ वेगितं गजमारुह्य.ऐरावतसमं गुणैः॥ यदन्यत्करणीयंमे.तदाज्ञापय यत्संप्रति॥ ॥श्रीभगवानुवाच॥ ॥करतोयासदा
गंगा.पूर्वभागावधिश्रिता॥ यावल्ललितकांताख्या.तावद्देशपुरंतदा॥ अत्र देवी महामाया.योगनिद्रा जगत्प्रसूः॥ कामाख्या रूपमा
स्थाय.सदा तिष्ठति शोभना॥ अत्रास्ति नदराजोयं.लौहित्यो ब्रह्मणः सुतः॥ अत्रैव दशदिक्पालाः स्वे स्वे पीठे व्यवस्थिताः॥ अत्र स्वयं महा
देवो.ब्रह्माद्याहव्यवस्थिताः॥ चंद्रः सूर्यश्च सततं.वसंतो त्रैवपुत्रक॥ सर्वे क्रीडार्थमायाता.रहस्यं देवमुत्तमं॥ अत्र श्रीः सर्वतोभद्रा
भोग्यमत्र तथा वसुः॥ अस्य मध्ये स्थितो ब्रह्मा.प्राग्नक्षत्रं ससर्ज ह॥ ततः प्राग्ज्योतिराख्येयं.पुरी शक्रपुरीसमा॥ अत्र त्वं वसभद्रते
ह्यभिषिक्तो मया स्वयं॥ कृतदारः सहामात्यै.राज्ञा भूत्वा महावलः॥ ॥मार्कंडेय उवाच॥ ॥एवमुक्त्वा स्वयं विष्णुः शंभो
रनुमते तदा॥ सर्वान्किरातान्पूर्वस्थां.सागरान्ते न्यवासयत्॥ पूर्वे ललितकांतायाः समारायावधिं पुनः॥ यावत्सागरप
र्यंतं.किरातास्तावदावसन्॥ पश्चाल्ललितकान्तायाः.देशं कृत्वावधिं पुनः॥ करतोयानदीयाव.त्कामाख्याललितं तु यत्॥
तस्मात्किरातानुत्सार्य.वेदशास्त्रातिगोत्तमान्॥ द्विजादीन्वासयामास.तत्र वर्णान्सनातनात्॥ वेदाध्ययनदानानि.सततं वर्त्ते
ते यथा॥ तथा चकार भगवान्.मुनिभिर्वासयन्प्रभुः॥ वेदवादरताः सर्वे.दानधर्मपरायणाः॥ नचिरादभवन्देशाः कामरूपाः
ह्वयास्तथा॥ ततो विदर्भराजस्य.पुत्रीं मायाह्वयां हरिः॥ पुत्रार्थे वरयामास.नरकस्य समागुणैः॥ तामुद्वाह्य तु सुश्रीकेशः

का·पु
९२

तस्मिन्पुरवरे स्वयं॥ तया समं स्वतनयं. राजत्वेनाभ्यषेचयत्॥ सुगुप्तां च पुरीं चक्रे. गिरिदुर्गे रमाधवः॥ तत् दुर्गं सर्वतो भद्रं. देवैरपि
दुरासदम्॥ ततः किरातराजस्य. चतुर्दन्ता मदन्तिनः॥ पंचविंशतिसाहस्रा. महामात्रकुथैर्युताः॥ यानि रत्नान्यनेकानि. सैन्यानि विविधा
नि च॥ अश्वांश्चाभरणांश्चैव. तत्सर्वं नरको ग्रहीत्॥ यद्यत्काम्बूषणां राज्ञो. ध्वजाश्चाभरणानि च॥ तानि तानि स्वयं विष्णुस्तनयस्य ददौ तदा
॥ रथं च प्रददौ तस्मै. त्रिषु लोकेषु दुर्लभं॥ लोहाष्टचक्रसंछन्नं सार्द्धयोजनविस्तृतं॥ युक्तमश्वसहस्रैस्तु. तथाष्टाभिर्मनोजवैः॥ रत्नका
ञ्चनचित्राङ्गं. वेदिकाभोगविस्तरं॥ वज्रध्वजेन महता. कांचनेन विराजितं॥ हेमदंडपताकाढ्यं. वैडुर्यमणिकूबरं॥ सिंहव्याघ्रसमु
द्भूतैः. छादितं चर्मभिः सदा॥ लोहभावेष्वसंछन्नं. किंकिणीजालमालितं॥ सर्वप्रहरणैर्युक्तं. वरूथाया समन्वितं॥ शक्तिं च प्रददौ
तस्मै. सर्वशत्रुविशातनीं॥ ज्वालामालातिदीप्ताङ्गीः रिपुकक्षाग्निरूपिणीं॥ इमं च समयं प्रोचे. नरकाय महात्मने॥ नरकस्य हिता
येशो. वसुधायाः समक्षतः॥ इमां शक्तिं न हि भवान्. प्राणहासंशयं विना॥ प्रयोक्ष्यसि कदाचित्तु. मानुषेषु विशेषतः॥ एषा मया च वै
दत्ता. भवतः सदृशी गुणैः॥ भवतो जीवनं यावत्तावत्स्थास्यति शोभना॥ द्वापरांते तु संप्राप्ते. प्रजा तव भविष्यति॥ विरोधो मुनिभिः
सार्द्धं. ब्राह्मणैरपि पुत्रक॥ न कदाचित्त्वया कार्यं. चिरंजीवितुमिच्छता॥ राजभिश्च न देवैश्च. विरोधो युज्यते तव॥ महास्वर्गस्य वै म
ध्ये. वसतो ह्यपराजिते॥ दिव्ययोषिद्गणैः सार्द्धं. वसमानो तिभोगवान्॥ सुपर्वते कामरूपे. चिरत्वं तिष्ठ पुत्रक॥ महादेवी महामा

रामः
९२

Public Domain. Digitization by eGangotri. Funding: MoE

यां जगन्मातरमंबिकां॥ कामाख्यां त्वं विना पुत्र नान्यं देवं यजिष्यसि॥ तस्मान्नरकयत्नेन समयं प्रतिपालय॥ इत्युक्त्वा भगवान्विष्णुर्न
कं तनयं त्वकं॥ तमपास्य रहस्येनां पृथिवीं वाक्यमब्रवीत्॥ यद्यत्त्वं मया प्रोक्तं कर्त्तव्यं तव सुंदरि॥ तत्तद्वै नरकायाशु त्वयैव समुपदे
शय॥ यदैव त्वं स्वयं हंतुं मां जगद्धात्रि भाषसे॥ तदा तु मानुषः कश्चिन्नरकं निहनिष्यति॥ ॥पृथिव्युवाच॥ प्रजार्थमेष यत्नो मे नि
यं स्यात्सन्ततिं विना॥ तस्मान्नाथ प्रयत्नान्मे सन्ततिं पालयिष्यसि॥ ॥मार्कण्डेय उवाच॥ एवमस्त्विति तां विष्णुः पृथिवीं प्रति:
पावनः॥ नरकं च समाभाष्य तत्रांतर्द्धिमगात्क्षणात्॥ गते हरौ निजस्थानं पृथिवी तनयं त्वकं॥ यत्त्वं हरिणा प्रोक्तं तत्र तं व्यनय
त्स्वयं॥ नरकोपि तदा धीमान् वेदशास्त्रार्थपारगः॥ ब्रह्मण्यो नीतिकुशलो वदान्यो दानतत्परः॥ कामाख्यापूजनरतो नील
कूटे महागिरौ॥ महाभोगी महाश्रीमान् हीनबाधश्च शत्रुभिः॥ सुचिरं राज्यमकरोत् शक्रवत्त्रिदशालये॥ ततो विदेहराजो
पि कृत्वैव नरकप्रियं॥ सपुत्रभार्यः सगणो नरकं द्रष्टुमभ्यगात्॥ प्राग्ज्योतिषपुरं गत्वा कामरूपांतरस्थितं॥ ददर्श नरकं राजा
शरच्चंद्रसमं श्रिया॥ प्राग्ज्योतिषपुरं मेने स राजा त्वमरावती॥ देवेंद्रं नरकं मेने सत्परिच्छदभूषणं॥ ततो महिष्यै तत्सर्वं जनको वा
क्यमब्रवीत्॥ एष ते पालितः सुतः श्रीमान्नरकसंज्ञकः॥ पृथिव्या दयितः पुत्रः संजातो घृष्टिरूपिणा॥ विष्णुना जगदीशेन
त्वमेनं पश्यतां गता॥ ॥मार्कण्डेय उवाच॥ इत्युक्त्वा जनको राजा यथावृत्तं तथा पुरा॥ वृत्तांतं कथयामास नरको ज्ञानवान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तर

यथा॥ ततस्तत्र चिरं स्थित्वा प्राग्ज्योतिषपुरे तु सः॥ विदेहाधिपती राजा नरकेन प्रपूजितः॥ स्वस्थानं गतवांस्तस्मात् स्वगणैः परिवारित
ः॥ एवं स नरको जातः पृथिव्यां ... नयस्तदा॥ हीनासुरस्वभावः स विजहार चिरं क्षितौ॥ ॥इति कालिकापुराणे एकोनचत्वा
रिंशोऽध्यायः॥३९॥ ॥मार्कण्डेय उवाच॥ स राजा नरकः श्रीमान् चिरजीवी महाभुजः॥ मानुषेणाथ भावेन चिरं राज्यमथाक
रोत्॥ त्रेतायां च व्यतीतायां द्वापरस्य तु शेषतः॥ श्रीमच्छोणितपुरे बाणो नाम महासुरः॥ तस्याग्निदुर्गं नगरं स च शंभुसखो ब
ली॥ सहस्रबाहुर्दुर्धर्षः सर्वेषु च प्रियो बलेः॥ नरकेन समं तस्य महामैत्री व्यजायत॥ गमनागमनं नित्यं मन्योन्यं तु गृहे त
दा॥ तयोरभून्महाप्रीतिः पवनानलयोरिव॥ स च बाणः समाराध्य महादेवं जगत्प्रभुं॥ आसुरेणाथ भावेन व्यवहारे कृतो
द्यमः॥ तत्संसर्गात्स नरको दृष्ट्वा तस्याद्भुताकृतिं॥ तेनैव सहभावेन विहर्तुमुपचक्रमे॥ न ब्राह्मणान्पूजयति यथापूर्वं त
था द्विजाः॥ न च यज्ञेषु दानेषु पूर्ववन्मुदितः स च॥ न तथा विष्णुमभ्येति पृथिवीं चापि नार्चति॥ कामाख्यायां तथा भक्तिं स्वद
त्तस्याथ नाभवत्॥ एतस्मिन्नन्तरे धातुस्तनयो मुनिसत्तमः॥ वशिष्ठो नाम कामाख्यां द्रष्टुं प्राग्ज्योतिषं गतः॥ तां दुर्गाभ्यन्तरे नी
ल कूटे देवीं च वस्थितां॥ द्रष्टुं गन्तुं वशिष्ठस्य न द्वारं नरको ददात्॥ ततो वशिष्ठः कुपितो वचनं परुषं मुनिः॥ जगाद नरकं वीरं
गर्हयन्नृषिसत्तमः॥ कथं पृथिव्यास्तनयो वराहस्य च तेजसा॥ देवीं द्रष्टुं ब्राह्मणस्य न ददासि तथागतः॥ किं ते कुलोचितं कर्म

Public Domain. Digitization by eGangotri and ...

त्वंकरोषिधरात्मज॥देहिप्राग्ज्योतिषंगत्वा,पूजयिष्येजगन्मयीं॥ततःसनरकोराजा,प्राप्तकालंक्षितेःसुतः॥परुषेणाथवाक्येनतम
क्षिप्यनिरस्तवान्॥ततोमुंःसकुपितःशशापनरकंनृपं॥नचिराद्येनजातोसि,तेनमानुषरूपिणा॥मरणंभवितापाप,वराहस्तु
तयोम्सुत॥मृतेत्वयिमहादेवीं,कामाख्यांजगतांप्रसूं॥पूजयिष्याम्यहंपाप,तिष्ठयास्येस्वमालयं॥त्वंयावज्जीवितापाप
कामाख्यापिनिजंप्रसूं॥सर्वैःपरिकरैःसार्द्धं,मन्त्रज्ञोनायगच्छतु॥ ॥मार्कण्डेयउवाच॥इत्युक्त्वाब्रह्मपुत्रःस,स्वस्थानंग
तवान्मुनिः॥वशिष्ठस्तेनभौमेन,निरस्तःकुपितोभृशं॥गतेवशिष्ठेनरकःशीघ्रंविस्मयसंयुतः॥जगामसदेवीभवनं,नीलकू
टंमहागिरिं॥तत्रगत्वानवापश्यत्,कामाख्यांकामरूपिणीं॥नयोनिमंडलंचास्याःसर्वान्परिकरांस्तथा॥ततःसविमनो
भूत्वा,क्षितिंसस्मारमातरं॥पितरंचजगन्नाथं,नरकःप्रभुमव्ययं॥नतावपितदायातौ,तस्यप्रत्यक्षतांद्विजाः॥व्युत्क्रां
तसमयस्येति,नीतिहीनस्यसंभवे॥चिरंप्रतीक्ष्यतौतत्र,भौमोवज्ज्वरस्तदा॥अप्राप्तक्षितिविष्णुःस,सशोकंस्वनिवेश
नं॥गच्छन्सस्वगृहंभौमःपुरींस्वांदृष्टवांस्तदा॥पूर्वश्रियापरित्यक्तां,मलिनींवनितामिव॥देव्यामन्तर्हितायांतु,वेद
वादविवर्जितां॥पुण्येस्वल्पादरजनं,तत्पुरंसमपद्यत॥नदेवास्तत्रगच्छंति,नविप्रानमहर्षयः॥बभूवनगरंतस्य
स्वल्पयज्ञक्रियोत्सवं॥इतियोवहवोजाता,मृताश्चवहवोजनाः॥लौहित्योनदराजोपि,हीनतोयस्तदाभवत्॥

तोमदत्य अध्यायः २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का.पु.
९४

बहूनिविपरीतानि.दृष्ट्वासनरकस्तदा॥मन्येमरणमासन्नं.मात्मनोब्रह्मशापतः॥ततःप्राग्ज्योतिषाध्यक्षःशोकविह्वल
चेतनः॥चिन्तयन्मनसामित्रं.बाणंबलिसुतंययौ॥सखाप्राणसमःसौम्य.सततंन्योन्यरक्षणे॥तत्रगौबाणनरकौ.स्ववैया
वश्विनाविव॥एतस्मिन्समयेमित्रं.बाणःशंभुसखोमम॥अनुकूलयितामंत्रप्रदानेनमहासुरः॥इतिचासीन्मतिस्तस्य.व
ज्रकेतोस्तदाचला॥द्रुतंचप्राहिणोद्दीप्तं.बाणस्यनगरंप्रति॥सशोणितपुरंगत्वा.स्यंदनेनाशुगामिना॥ततोभौमस्यवृत्तांतं.बाण
याशुन्यवेदयत्॥यथाशप्तोवशिष्ठेन.यथाचाराधिताम्बिका॥यथाविघ्नःसुरवरे.जातप्राग्ज्योतिषाक्षये॥समयस्यव्यतीक्रांति.
र्मृत्तिमाधवयोर्यथा॥तथासद्भूतोभौमस्य.शशंसबलिसूनवे॥सततदाकर्ण्यमित्रस्य.सम्यग्देवपराभवं॥स्वयंजगामनरकं.
समाजयितुमीश्वरः॥सकांचनविचित्रांगं.युक्तमश्वशतैस्त्रिभिः॥लोहचक्रंचवैयाघ्रं.मयूरध्वजभूषितं॥हेमदंडसितछत्र.
छादितंकिंकिणीगणैः॥नानारत्नौघरचितं.मारुरोहमहारथं॥सहस्रभुजतःश्रीमान्.चतुरंगबलैर्युतः॥प्राग्ज्योतिषंभौ
मपुरं.मचिरादाजगामह॥तमासाद्यमहाबाहुः.बाणःप्राग्ज्योतिषेश्वरं॥हीनंपूर्वश्रियामित्रं.मपश्यन्नगरंचतत्॥सतेनपू
जितोबाणो.यथायोग्यंस्वतेनकौः॥पप्रच्छकिंनिमित्तंते.हीनश्रीकमभूत्पुरं॥शरीरंचयथापूर्वं.तथानतवराजते॥म
नश्चैतेनातिहृष्टं.तत्रहेतुंवदस्वमे॥एवमादीनिपृष्टःस.नरकःक्षितिनंदनः॥यथावशिष्ठशापोभूत्.तत्सर्वंतस्यचाब्रवीत्॥

रामः
९४

यच्छ्रुतंभीमवदना.त्वद्दूतावेदितंपुरा॥ ज्ञात्वातथातंप्रोवाच.वाणोवज्रध्वजंपुनः॥ नहिमन्युस्त्वयाकार्य्यः सुखदुःखेशरीरिणां॥
वक्रंवत्सरिवर्त्तंते.नैताभ्यांकोपिहीयते॥ परंतत्रप्रतीकारःकार्य्योधीरैर्विभूतये॥ भवाननपिप्रतीकारं.कर्त्तुमर्हतिसंप्रति॥ धए
वमानुषःपृथ्व्या.समाधारणभूतिभिः॥ वर्द्धतेदानवोवापि.दैत्योप्यथवासुरः॥ राक्षसःकिन्नरोवापि.शक्रस्तान्सहतेनहि
॥ सकौटिल्यंदेवगणैःसार्द्धंकुर्वन्तितत्त्वतः॥ यथातथाप्रकारेण.भृशमत्येवतंप्रियः॥ तस्यचेष्टतमोदेवो.विष्णुर्नित्यंसना
तनः॥ सनशक्रस्यकुरुते.मनोनिष्टंमनागपि॥ यःसमाधारयेद्विष्णु.शक्रस्यानिष्टकारकः॥ तस्मैवरंतुसच्छिद्रं.दत्वातं
शातयत्युत॥ चिरमाराधितोविष्णु.रिष्टान्कामान्प्रयच्छति॥ महताकायदुःखेन.पूजितःसंप्रदास्यति॥ विनेष्टदेव
तापूजां.विभूतिमतुलांपुमान्॥ कःप्राप्नोतिक्षतःपूर्वं.नवापूर्वतरःक्वचित्॥ त्वयानाराधितापूर्वं.ब्रह्मविष्णुमहे
श्वराः॥ तेनतेचमहाविघ्ना.उत्पन्नाविषयेतव॥ योवाविष्णुःपालकस्ते.ननिसर्गानुकंपकः॥ किंतुतेसाक्षिनेवाक्या.त्व
याचाराधितोमुकुः॥ दत्तच्छिद्रप्रदंतेविष्णु.स्त्वापराध्यात्त्वयाद्विजाः॥ इतोन्यथात्वंभविता.हतश्रीरितिनःश्रुतं॥ अपराद्धं
त्वयाभूयो.वशिष्ठःपरमोमुनिः॥ तेनस्मरणमात्रेण.नागतोक्षितिमाधवो॥ तस्मात्त्वंमित्रबुध्यास्य.कौटिल्यंहरिमेध
सः॥ नाधुनायुज्यतेभीम.तवोदासीनताहृति॥ यन्नेमनसितातोय.मितिसंप्रत्ययेनते॥ वाराहरवतेनातःसवलो॥

का.पु.
९५

कांतरंगतः॥वराहोपिहरेरंश.इतियत्प्रोच्यतेत्वया॥तस्यांशाइत्यनुक्रोशः केनवाक्रियतेवद॥तस्मात्वंकुरुशंभोर्वा.ब्रह्मणोवा
समर्चनं॥सतेत्रसन्तुःपरम.मिष्टंकामंप्रदास्यति॥विष्णोर्वामुनिशापेवा.सहेतिर्वातिपीडिता॥विधौप्रसन्नेशंभौमान.चिरात्स
यमेष्यति॥ ॥मार्कंडेयउवाच॥ जानन्सत्पुत्रयोभौमो.बाणस्यवचनात्तदा॥सुप्रीतःसन्नुवाचेदं.धीरधर्मरतिःसुतः॥ ॥
भौमउवाच॥ ॥यत्त्वयागदितंबाण.हितंमेमित्रवत्सल॥तत्कार्य्यमचिरादेव.तपश्चरणमुत्तमम्॥द्विस्तुत्वाराधनीयोमे.तत्रहे
तुस्त्वयोदितः॥नैवाराध्यस्तथाशंभु.रन्नगुप्तःसमेसुरे॥तस्माद्ब्रह्मामयाराध्यो.वचनात्तवमित्रक॥तत्तुत्रस्यमहाबाहो.लोहि:
त्यरूपांवुसन्निधौ॥भवताध्यापितश्चाहं.शिष्योथगुरुणायथा॥मित्रमित्रयथाधीर.साम्नापरवल्गुन॥ ॥मार्कंडेयउवा
च॥ ॥इत्युक्त्वासमहाबाहु.र्बाणंवज्रध्वजस्तदा॥यथावत्पूजयामास.समित्रंमित्रवत्सलः॥स्वर्द्धयित्वायथायोग्यं.प्रस्थाप्यचवले
:स्तुतं॥ब्रह्माराधनमव्यग्रं.कर्तुमैच्छत्क्षितेःसुतः॥सतीरेनदराजस्य.लौहित्यस्यमहात्मनः॥ब्रह्माचलंसमारुह्य.तपस्तप्तुमुपस्थि
तः॥सम्यक्तुषेणमानेन.क्षितिपुत्रःशतंसमाः॥जलाहारव्रतेनैव.समानर्च्चपितामहं॥सतुष्टःशतवर्षान्ते.ब्रह्मालोकपितामहः॥प्र
त्यक्षीभूयनरकः स्यागतःसमुपस्थितः॥प्रीतोस्मितेवरंदास्ये.वरंवरयसुव्रत॥इतिवोवाचनरकं.सतदाकमलासनः॥सहृष्टःस
र्वलोकेशं.प्रत्यक्षंकमलासनं॥प्रणम्यप्रांजलिःप्रोचे.विनयाननकंधरः॥देवासुरेभ्योरक्षोभ्यःसर्वेभ्योदेवयोनितः॥स्ववध्यत्वंसु

रामः
९५

Public Domain. Digitization by eGangotri. Funding: MoE

रम्येस्तु वरमेकं प्रयच्छ मे॥ अविच्छिन्ना सन्ततिर्मे या. वंशं ज्ञोरविस्तये न्॥ तावद्भव तु लोकेश. द्वितीयोयं वरो मम॥ तिलोत्तमाद्याया देव्यः सद्रूप
गुणसंयुताः॥ तास्मेपा दयिताः सन्तु. सहस्राणि तु षोडश॥ अजेयत्वं सदा श्रीर्मे. न जरा तु विभूतिभिः॥ इति पञ्च वरा मेघ. वृतास्त्वत्तः पिताम
ह॥ ॥मार्कण्डेय उवाच॥ ॥मायया मोहितो भौमो. मुनिशापं विस्मृत्य च॥ अन्यं वरान्तरं वव्रे. मुनिशापस्तथास्थितः॥ एवमस्त्विति ता
नुक्त्वा. त्वरान्वत्वा पितामहः॥ उवाच देवं परान्ते. संध्यायां सुरकन्यकाः॥ तिलोत्तमाद्यास्ते जायाः संभविष्यन्ति भूतले॥ नयावन्नारदो या
ति. वज्रध्वजपुरन्तव॥ तावन्न मैथुने योज्या. भवतास्ताः क्षितेः सुत॥ इत्युक्त्वा सर्वलोकेश. स्तत्क्षणान्तर्हितो भवत्॥ मुदमासाद्य परमां. स्व
स्थानं नरको भ्ययात्॥ ततो मुदितलोकं तं. नगरं श्रीनिकेतनं॥ सदा सोत्साहपृतनं. ईतिदोषविवर्जितं॥ अभवत्प्रभुशस्त्रौघ. वाजिवार
णकुंजरैः॥ संपूर्णं देवराजस्य. दयिते वामरावती॥ उत्तीर्णे तपसंश्रुत्वा. वाणो ध्वनवरस्तथा॥ स्वयं पुनरुपातिष्ठ. द्भौमं वज्रध्वजं तदा॥ सगत्वा
भौमनगरं. वाणः प्राग्ज्योतिषाह्वयं॥ पप्रच्छ नरकं मित्रं. तपसः सन्निवेशनं॥ कुत्र त्वया तपस्तप्तं किं वा चीर्णं त्वया कृतं॥ कीदृशो वा वरो लब्ध.
स्तन्ममाख्यातुमर्हसि॥ दृष्टं तव पुरं सर्वं. प्रहृष्टजनसंकुलं॥ वाजिवारणरत्नौघ. पूरितं मंगलध्वनि॥ दृश्यते यत्त्वया पाल्यं. शस्यपूर्णमना
मयं॥ कथय त्वं कथं तुष्टा. वरं तुभ्यं प्रदत्तवान्॥ ॥भौम उवाच॥ ॥तुष्टा स्वयं पर्वतरूप. धारी कामेश्वरी धनुर्मिहावती एणः तत्र त्व
यं संप्रतियस्त्वमेति. पुरा नयावत्दशापते वशिष्ठः॥ सोयं पुरे मे वलिपुत्रराज. ते देवौघ सेव्यो थमरोत्तमो शः॥ तत्राहमेको वरतोयभो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का॰पु॰
९६

जनो वर्षाण्यकार्षं च तपः शतानि वा॥ लौहित्यतीरे जलवायुसेविते मनोहरे प्राणभृतां सुखप्रदे॥ तपः प्रवृत्तस्य सुखं समागमन् शरद्यथैकः
शरदां शतानि मे॥ ततः स तुष्टश्चतुराननो भवन्प्रत्यक्षतो मामगदच्च सद्धितं॥ तव प्रसन्नोस्मि वरं यथेप्सितं दास्ये गृहाणेति पुरोथ भूत्वा॥ स्व
वध्यतामेः सुरयोनितः सुरादद्भिन्नसत्त्वान्नमजेयतां तथा॥ सदा विभूतिर्न जहातु मामिति वरांश्च नाथ्यो नकथ्योव नान्वितः॥ एते वराः पंचम
यातनो वृताः सोपि प्रतिश्रुत्य गतो निजास्पदं॥ ततोहमभ्येत्य निजं पुरं मुदा समं त्रिवीरैः सहितैः समन्ततः॥ पौरान्सबंधून्सुगणान्स
मोदयन् दानेन मानेन नवभोजनेन॥ ॥मार्कण्डेय उवाच॥ इतीरितं तस्य वलेः सुतस्तदा भौमस्य श्रुत्वा न मुमोद तत्क्षणात्॥ इदं तदा वै वव
चः क्षितेः सुतं तत्कालयुक्तं न व सन्नृतोद्भवं॥ नैतेषु नेः शापमतीत्य गंतुं भूता मतिर्भिन्न तदा विधेः पुरः॥ कथं नु भद्रं भविता तवेह भावी त्यव
श्यं क्षितिपुत्र नित्यं॥ कृतस्य करणं नास्ति दैवाधिष्ठितकर्मणः॥ भावी त्ववश्यं प्रज्ञावान् तत्र तु स्यात्प्रबाधकः॥ तस्मात्त्वं सुमहावीरान् सुरान्याव
कोपमान्॥ संधाय च पुरस्कृत्य साचिव्ये विनियोजय॥ द्वारि संस्थाप्य वै वीरान् देवैरपि दुरासदान्॥ अतिक्रमस्तदेवेशं यदि लब्धवरो भवान्॥
विधिनात्र्यो वरो दत्तो भवतेनत्परीक्षणं॥ कर्तुमर्हसि जायायां स्वपुरे जनयात्मजं॥ इत्युक्त्वा प्रययौ वाणो यथावन्नेन पूजितः॥ नरको मित्रव
चनं कर्तुं समुपचक्रमे॥ ॥इति कालिकापुराणे चत्वारिंशोऽध्यायः॥४०॥ ॥मार्कण्डेय उवाच॥ अतु मत्यां तु जायायां काले स नरकः क्र
मात्॥ भगदत्तं महावीर्यं मदवन्तं सुमालिनं॥ चतुरो जनयामास पुत्रान्स तान् क्षितेः सुतः॥ महासत्त्वान्महावीर्यान् वीरैरन्यैर्दुरासदान्॥ ततो
बाणस्य वचनाद्धयग्रीवं तथा मुरुं॥ संधायाथ समानीय सेनापत्येभ्यषेचयत्॥ मुरुं सुनिहितं कृत्वा हयग्रीवं च भौमिना॥ ये ये क्षितौ तदा ह्या
सन्नसुरास्तेपि संगताः॥ हयग्रीवं मुरुं कृत्वा नरकेन समागतं॥ निसुंद सुंदनामानौ वसुरोमै निकेः सह॥ विरूपाक्षस्तदा दैत्यः सर्वे ते वशमागमन्

राम
९६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दनुं विरूपाक्षं च दक्षिणे॥ मध्ये पंचजनं सुंदं सेनापत्येभ्यषेचयत्॥ मुरुः स्वरान्नान्पाशांस्तु षट्सहस्राण्ययोजयत्॥
द्वारि तत्पुरस्य रक्षार्थं सत्कृतः क्षितिसूनुना॥ एवं पूर्वान् पूर्वतरा नव मंत्रस्तु मंत्रिणः॥ असुरैरेव सततं सोऽसुरो मुदितो भ
वत्॥ पूर्वं गृहीतभावं स परित्यज्य क्षितेः सुतः॥ आसुरं भावमासाद्य बाधते त्रिदिवौकसः॥ न देवान् न मुनीन् विप्रान् नावजा
नाति कांश्चन॥ सुरेश्वरजिगीषुस्तु हयग्रीवसहायवान्॥ एवं स चासुरं भावं तन्वानो विचरन् क्षितौ॥ बाणस्य वचनात् श
त्रून् बाधयत्येव वै मुनीन्॥ देवेश्वरं हठाज्जित्वा हयग्रीवसहायवान्॥ अदित्याः कुण्डलयुगं त्रिषु लोकेषु दुर्लभं॥ सर्व
रत्नान्यतस्त्वाविश्य दुःखविघ्नहरं परं॥ जहार नरको भौमो निर्भीतो देवशापतः॥ एवं न देवान् बाधमानो मुनीन् विप्रान् क्षितेः
सुतः॥ पंचवर्षसहस्राणि राज्यं प्राग्ज्योतिषेऽकरोत्॥ एतस्मिन्नंतरे देवी महाभारार्दिता क्षितिः॥ ब्रह्मविष्णुमुखान्देवान्
रक्षार्थं शरणं गता॥ इदं चोवाच धातारं प्रणम्योर्वी समाधवं॥ दानवा राक्षसा दैत्या हरिणा ये निसूदिताः॥ ते राज्ञां मंदिरे जाः
ता अधुना बलगर्विताः॥ तेषां भारमहं वोढुं न शक्नोमि महत्तरं॥ असंख्याताश्च ते सर्वे तान्संख्यातुं न चोत्सहे॥ अष्टौ शतसह
स्राणि तेषां मुख्या महाबलाः॥ तेषां च्यातिबलानेतान् वोढुं शक्नोमि नाधुना॥ बाणं बलेः सुतं वीरं कंसं धेनुकमेव च॥ अरिष्टं च
प्रलंबं च सुनामानं मुरुं रूसलं॥ चाणूरमुष्टिकौ मल्लौ जरासंधं महाबलं॥ नरकं च हयग्रीवं निसुंदं सुंदमेव च॥ विरूपाक्षं पं

का·पु· वजं हिडिंबं चबकं बलं ॥ जटासुरं च किर्मीरं मल्लायुधमलंबुसं ॥ सौधांसं च जरासंधं द्विविदं चापि वानरं ॥ कृतापुत्रं महादैत्यं शता
२७ युधमतः परं ॥ अघाख्यं गर्दभं तं चैव सुबाहुमतिबाहुकम् ॥ कालकेजांस्तथा दैत्यान्हिरण्यपुरवासिनः ॥ एतेषां च पदक्षोभैर्विशीर्णो
हन्दिने दिने ॥ लोकान्वीरं नशङ्को मित्तान्विघ्नं तु सुरेन्द्र माः ॥ नवेदत्तां प्रकुर्वन्ति भवन्त सुरसत्तमाः ॥ तदा विशीर्णा यास्यामि पातालमव
शाधुना ॥ ॥ ॥मार्कण्डेय उवाच॥ ततस्तस्या वचः श्रुत्वा ब्रह्मविष्णुमहेश्वराः ॥ इत्यूचुस्तैः करिष्यामः क्षिते भार विमोक्षणं ॥ विसृज्य
पृथिवीन्देवीं सर्वे देवाः सनातनं ॥ माधवं तोषयामासु भारावतरणं प्रति ॥ स च तुष्टः सुरान्सर्वान्स्वांशैरवतरं तु वै ॥ क्षितौ भाराव
तारायेत्युक्त्वा स्वयमिह प्रभुः ॥ अवतीर्णो थ देवक्या गर्भे भारावतारणे ॥ विष्णुं चावतरिष्यं तं ज्ञात्वा देवाः सनातनं ॥ रंभातिलोत्तः
माद्यास्ते देवीरूपगुणान्विताः ॥ स्त्रियो वुत्पादयामासुः सहस्राणि तु षोडश ॥ ताः सर्वा हिमवत्पृष्ठे क्रीडमाना वरस्त्रियः ॥ अथ
श्चान्नरको भौमस्ताजहार तत्पुरःतान्स तेन ताधर्षिता देवो नीताः प्राग्ज्योतिषं प्रति ॥ नरकं प्रार्थयामासुः समयं मैथुनं प्रति ॥ नारदेः
या वदायाति नगरं प्रति भौमते ॥ अस्माकं कुरुहसाश्वतावत्तो मुं चमैथुने ॥ स समेष्यति वीरत्वां न विरन्त्रा ह्यनुग्रहात् ॥ तेन दृष्ट्वा वयंसा
र्द्धमेष्यामः संगमं त्वया ॥ इति संप्रार्थितस्ताभिर्न्नरको भूमिनंदनः ॥ ब्रूवस्तवा कंतदास्मत्वा भवति न्युविवान्मुरुः ॥ एतस्मिन्नन्तरे विष्णु रामः
रवतीर्णो धरातले ॥ देवक्या जठराज्जातो वृंद्धानंदगृहे भवत् ॥ केशकेशिप्रलंबादीन्हत्वा दैत्याननेकशः ॥ अकरोद्द्वारकावासं साग २७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रेसलिलान्तरे॥ तत्राष्टैवकन्यकास्तेन सुधर्मेणावरवीकृताः॥ कालिंदीमानुषीरूपारुक्मिणीरमणीतथा॥ नग्नजित्तनयासत्यालक्ष्मणाः
चारुहासिनी॥ सुशीलाशीलसंपन्नातथाजांववतीसती॥ एतास्वष्टासुसततंमनुरक्तस्यतस्यवै॥ षड्विंशद्वत्सरायातावलदेवसहा
यिनः॥ प्रद्युम्नसांवप्रमुखाःपुत्रास्तस्यमहावलाः॥ जातास्तत्रद्विजश्रेष्ठाःशास्त्रेशस्त्रेचनिष्ठिताः॥ अनेकेनिहतादैत्याभारभूतास्तत्र
क्षितेः॥ प्रहृष्टःक्रीडमानश्चद्वारकायामुवासवः॥ अथशक्रस्तदायातोनरकेनार्द्दितोभृशं॥ द्वारकांप्रतिकृष्णस्यदर्शनायगणैःस
ह॥ तत्रगत्वापरिष्वज्यकृष्णंलोकनमस्कृतं॥ पूजितस्तेनवकुशआसनेकांचनेस्थितः॥ कथयामासहरयेनर
कस्यविचेष्टितं॥ शक्रोयथापूर्ववृत्तंयथावावर्त्ततेधुना॥ ॥शक्रउवाच॥ श्रणुकृष्णमहावाहोयदर्थ
महमागतः॥ कथयिष्यामितत्सर्वंतत्रशंकाशनंकुरु॥ भूमिपुत्रोऽसुरोदुष्टोनरकःसुरमर्द्दनः॥ चिरजीवीपु
राविष्णुक्षितिभ्यांपरिपालितः॥ अधुनासक्षितिविष्णुमवज्ञायदुरासदः॥ वाणस्यवचनादुक्तोवृह्मणांपर्यतोष
यत॥ वृह्मणःसवरांल्लब्ध्वाह्यतीवाभ्रंशदर्पितः॥ माधवंपृथिवींवापिसस्मारनकदाचन॥ पूर्वमासीत्सधर्मात्मा
ह्यवाधितसुरोव्रती॥ अधुनावाधतेसर्वान्नासुरंभावमास्थितः॥ अदितेकुंडलेमोहाज्जहारामृतसंभवे॥ देवान्
षींवाधमानोविप्राणामप्रियरतः॥ मांचापिवाधतेनित्यंकामगामिदुरासदः॥ तवचोपान्तरंप्रेक्षीपापंजहिविभूतये॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इदानीं नारदः पुरं प्रतिगतः पर्थः ६

का०पु ९८

त्वदर्थं सर्वदेवैर्या देवगंधर्वकन्यकाः॥ पुरा पर्वतमुख्येषु हिमवत्यवतारिताः॥ चतुर्दशसहस्राणि सहस्रे द्वे शताधिके॥
ताः सर्वाः कन्यकाः पापः प्रसह्य वरदर्पितः॥ जहार स दुराधर्षो हयग्रीवसहायवान्॥ सागरेभ्यो निरत्नानि पृथिव्यां च त्रिवि
ष्टपे॥ तानि सर्वाणि संहृत्य प्रमथ्य सुरमानुषान्॥ गिरौ लोहित्यसंज्ञस्य सोकरोन्मणिपर्वते॥ तस्मिन्गिरौ पुरीं रम्यां का
रयित्वा कलाढ्ययो॥ ताः सर्वा वासयामास देवगंधर्वयोषितः॥ एकवेणीधराः सर्वाः संभोगरसवर्जिताः॥ त्वां मवताः प्रती
क्षन्ते सनाथाः कुरु कृष्णताः॥ यावदागच्छति पुरं भगवतो नारदो मुनिः॥ तावन्नो मैथुने यत्नं भौम त्वं न करिष्यसि॥ इति
ताः समयं चक्रु नरकस्य दुरात्मनः॥ नारदश्च तदा यातः प्राग्ज्योतिषपुरं प्रति॥ यदा त्वं नरकं हन्तुं गन्ता तत्पुरमुत्तमम्
॥ तस्मात्त्वं पापकर्माणं नरकं नरकोपमं॥ जहि देवमनुष्याणां कंटकं हि दुरासदं॥ वधान्तस्य क्षितिर्देवी पुत्रशोकं न
वाप्स्यति॥ स्वयमेव वधं तस्य देवेभ्यो यद्यावत॥ तस्मात्त्वं जहि पापिष्ठं नरकं पापपूरुषं॥ स्त्रीरत्नान्यपि रत्नानि तन्निहृः
त्य समुद्धर॥ इत्युक्तो जगतां नाथः शक्रेण सुमहात्मना॥ प्रतिजज्ञे क्षितिसुतं हंतुं प्रति तद्देव हि॥ प्रतिज्ञाय वधं तस्य
शक्रेण सह केशवः॥ तदेव सा त्राम करो प्राग्ज्योतिषपुरं प्रति॥ आरुह्य गरुडं कृष्णः सत्यभामाद्वितीयकः॥ प्राग्ज्यो राम: ९८
तिषमुरेवागच्छत्स शक्रस्त्रिदिवं ययौ॥ दिवमाक्रम्य गच्छन्तौ शक्रविष्णू महामती॥ याद वादद्दृशुस्तत्र सूर्याचन्द्रमसो यथा

॥संस्तूयमानोगंधर्वैर्देवैरप्सरसांगणैः॥कृष्णश्शंखौक्षणाद्देवगतोरेवतावदृश्यतां॥ततःक्षणेनगरुडेनाससादजग
त्पतिः॥पुरंप्राग्ज्योतिषंरम्यंनरकेनसमीकृतं॥सुदुर्गमैरगैःपाशैःषट्सहस्रैर्भयंकरैः॥क्षुरान्तैर्वेष्टितंपार्श्वैर्मन्युपा
शैरिवोच्छ्रितं॥निर्गच्छंतंपुरंतस्मान्नारदंचददर्शसः॥सतुदेवमुनिःश्रीमान्यदागान्नरकंपुरा॥तदाप्राग्ज्योतिषंगत्वास
त्कृतस्तेननारदः॥संगमेसमयंप्रोचेनरकोमरयोषितां॥पर्वतेतेहिवैचैत्रस्यशुक्लपक्षस्यपंचमी॥नवम्यांतुधरापुत्रप्राप्ता
तिमहदापदं॥तत्रायातिचतुर्दश्यांसुस्नातायोषितस्त्विमाः॥सुरतेषुत्वयातत्रप्रयान्तव्यायथासुखं॥नारदस्यवचःश्रुत्वा
नरकोभयमोहितः॥आसारंचप्रसारंचनगरेसन्यषेधयत॥रक्षीभीरक्षितेराज्येरक्षितश्वसमंततः॥भयहर्षयुतोभौमः
समयंप्रत्यवैक्षतः॥तस्मिन्नवसरेप्रापकृष्णःप्राग्ज्योतिषंपुरं॥प्रथमंपश्चिमद्वारमासाद्यगरुडध्वजः॥पाशान्षट्
सहस्राणिक्षुरान्संछिद्यनैकधा॥जघानसमुरुंदैत्यंसानुगंचसवांधवं॥षट्सहस्रमहावीरादानवाद्वारिसंस्थिताः॥
हताश्चक्रेणहरिणातदेवंमुहूर्णासह॥हत्वामुरुंसहस्राणिपुत्रांस्तस्यापरांस्तुषट्॥जघानचक्रेणतदाखंडशोन्येचद
नवाः॥ततोनेकान्शिलासंहान्नतिक्रम्यजनार्द्दनः॥सगणांसहानुगंचनिसुंदसमपोथयत्॥एकोयोयोधयद्देवान्सह
स्रवत्सरान्पुरा॥शक्रंचसमतिक्रम्यमहावीरपराक्रमः॥तंजघानहयग्रीवंसमतिक्रम्यकेशवः॥मध्येलोहितगंगस्यभगवा

का० पु
९९

न्देवकीसुतः॥ औदकायं विरूपाक्षं सुंदं हत्वा महावलः॥ ततः पंचजनं वीरं जघान परमेश्वरः॥ एतान्हत्वा महाकायान् महा
वीरान्दुरासदान्॥ आससाद जगन्नाथः पुरीं प्राग्ज्योतिषाह्वयां॥ वियत्स्थैर्देवतैः सर्वैर्न्नारदेन महात्मना॥ जयशब्दस्तू
यमानः प्रविवेश यथेश्वरः॥ श्रियाप्रदीप्यमानां प्रकाराट्टालभूषितां॥ समेने नगरीं विष्णुः किमिंद्रस्यामरावती॥
तत्र युद्धं महद्भूतं नानाप्रहरणोद्यतं॥ भीरूणां त्रासजननं शूराणां हर्षवर्द्धनं॥ यथा देवासुरं युद्धं तथैव समयद्य
त॥ ततः शार्ङ्गविनिर्मुक्तै र्वाणैस्तान्दानवान्वहून्॥ निजघान महावाहु र्गरुडस्थो जनार्द्दनः॥ अष्टौ शतसहस्राणि
अष्टौ शतशतानि च॥ हत्वासुरान्महावाहु न्नरकं तं समासदत्॥ ततः श्रुत्वा स नरकः पतितान्नसुरान्वहून्॥ दृष्ट्वा हृष्टं
महावाहुं गरुडस्थं महावलं॥ वशिष्ठशापं सस्मार समयं माधवस्य च॥ नारदस्य वचं श्रुत्वा वरच्छिद्रं तथा विधेः॥ सं
प्राप्तकालश्च तदा केशवेन समागतः॥ युद्धमेव परं मन्ये स्मरन्वाणवचस्तदा॥ स कांचनं समारुह्य रथं वज्रध्वजं व
रं॥ लोहचक्राष्टसंयुक्तं त्रिपुरप्रतिमं रथं॥ युक्तमश्वसहस्रैस्तु वज्रध्वजविराजितं॥ नानाप्रहरणोपेतं वकुतूणीर
संयुतं॥ आगच्छत्समरायाशु नरकः पृथिवीसुतः॥ स गच्छन्समरायाशु मानुषं भावमास्थितं॥ निर्द्धनं तथा सुरमेनेः
स्मरन्पूर्वं वचो हरेः॥ क्षणात्प्राप्त स ददृशे गरुडोपरिसंस्थितं॥ शंखचक्रगदाशार्ङ्ग वरासिधरमच्युतं॥ किरीटकुंड

रामः
९९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लयुतं श्रीवत्सवक्षसंहरिं ॥ कौस्तुभोद्भासितोरस्कं पीतांवरधरंपरं ॥ सतेनयुयुधे वीरो विष्णुनाप्रभविष्णुना ॥ प्राग्ज्योतिषा
धिपो भौमो नरकः पृथिवीसुतः ॥ सयुध्यन् कृष्णनिकटे कालिकांकालिकोपमां ॥ रक्तास्यां नयनां दीर्घां खड्गपाशधरान्तथा
अपश्यज्जगतां धात्रीं कामाख्यामपि मोहिनीं ॥ सविस्मितस्तदाभीतस्तां दृष्ट्वा जगतां प्रसूं ॥ योद्धव्यमित्येव तदा सुयुधे नर
कासुरः ॥ तेन सार्द्धं तदा कृष्णः कृत्वा सुमहदद्भुतं ॥ युद्धं यादृक पुराभूतं न देवेन च मानुषे ॥ ततस्तेनाथ भौमेन युद्धके
लिं समाधवः ॥ चिरं कृत्वा जगन्नाथो देवेन्द्रप्रीति हर्षयन् ॥ सुदर्शनेन चक्रेण मध्ये देशे तदा हरिः ॥ चिच्छेद नरकं वीरं पश्यतां
त्रिदिवौकसां ॥ विभक्तं तत शरीरं तु भूमौ निपतितं तदा ॥ विराजते वज्रभिन्नं यथा गैरिकपर्व्वतं ॥ पतितं तनयं देवी पृथ्वी दृ
ष्ट्वा शरीरकं ॥ शोकवेगं तदासेहे ज्ञात्वा कालं तदागतं ॥ अदितेः कुंडलयुगं स्वयमादाय काश्यपी ॥ उपातिष्ठत गोविन्दं व
चनं चेदमब्रवीत ॥ त्वया वराहरूपेण यदाहं चोद्धृता पुरा ॥ तदा त्वद्गात्रसंस्पर्शात् सुतो मे नरकः स्थितः ॥ सोयं त्वया पा
लितश्च पातितश्चाधुना सुतः ॥ गृहाण कुंडले चेमे ह्यदितेः सर्वकामदे ॥ संततिं चास्य गोविंद प्रतिपालय नित्यदा ॥ ॥ ॥
॥ ॥भगवानुवाच॥ भारावतरणो देवि नरकस्य वधः पुरा ॥ त्वयैव प्रार्थितो यस्मात्तेनासौ निहतो मया ॥ पालयि
ष्येस्य सन्तानं देवि तद्वचनादपि ॥ प्राग्ज्योतिषेभिषेक्ष्यामि नप्तारं भगदत्तकं ॥ एवमुक्त्वा महाबाहुर्भगवान्मधुसूदनः ॥

का०पु
१००

॥ अन्तःपुरं विवेशाथ नरकस्य वरालयं ॥ स तत्र ददृशे वीरो रत्नानि विविधानि च ॥ राशीकृतानि शुद्धानि पर्वतानि च राजत
ः॥ मणिमुक्ताप्रवालानां वैदूर्याणां च पर्वतं ॥ तथा रजतकूटानि वज्रकूटानि माधवः ॥ सुवर्णसंचयाञ्छुक्लदंडान्रत्नमया
न्ध्वजान् ॥ वाहनानि विचित्राणि यानानि शयनानि च ॥ खचितानि स्वर्णरत्नैर्महार्हाणि महान्ति च ॥ यच्च दृष्टं च या वस्त्र
धनं रत्नमणिस्तथा ॥ भुवि तादृक्क्वचनो दृष्टमन्यत्र नरकालयात् ॥ न कुवेरस्य नेन्द्रस्य न यमस्याप्यपांपतेः ॥ तावन्ति
धनरत्नानि यावन्ति नरकालये ॥ केशवोप्यथ धात्र्यैव नारदेन च संगतः ॥ प्रवेश्यान्तःपुरधनं सारं सारतरं ततः ॥ तेषांस
माददे ग्राह्यं प्रभूतं परवीरहा ॥ या दत्ता वैष्णवी शक्तिः विष्णुना प्रभविष्णुना ॥ हत्वा भौमं तु तां शक्तिं जग्राह देवकीसुतः ॥
पृथिव्या नारदेनैव सहितः केशवस्तदा ॥ भगदत्तं भौमसुतं प्राग्ज्योतिषपुरोत्तमे ॥ अभिषिच्य तदा भूपं पुरमध्ये न्यवेः
शयत् ॥ अभिषिक्तं तु तं दृष्ट्वा भगदत्तं तथा क्षितिः ॥ तत्पुरःस्थेन तां शक्तिं केशवं समयाचत ॥ केशवोपि क्षितेर्वाक्यान्नारदा
नुमतेन च ॥ तां शक्तिं भगदत्ताय सुप्रीतमनसा ददौ ॥ यच्छत्रं वरुणाज्जित्वा कांचनाश्चाविसंज्ञकं ॥ समानयेत्सुरा भौमस्तच्छ
त्रं हरिराददे ॥ अष्टभारसुवर्णानि यत्स्रवति चान्वहं ॥ यत्क्रोशमात्रं विस्तीर्णं मद्धयोजनमुच्छ्रितं ॥ रत्नोत्तमानि सर्वा
णि चतुर्दन्तांस्तथा गजान् ॥ चतुर्दश सहस्राणि पूजितान्प्रमदोत्कटान् ॥ द्वारिकां प्रति दैत्यौघैर्वाहयामास केशवः ॥ यदेवकन्याः

राम:
१००

काः पूर्व्वं नरकेन हृता बलात ॥ तासां कृत्वा हृषीकेशो केशी वंधविमोक्षणं ॥ वासोभिर्भूषणैर्द्दिव्यैस्ताः संस्कृत्य मुकुंदः ॥ आ
रोप्य च विमाने तु रक्षिभिर्व्वलिभिर्द्दृढैः ॥ नारदाधिष्ठिताः सर्व्वा द्वारकां प्रत्यवाहयत ॥ यः कृतः सुरकन्यार्थं भौमेन मणिपर्व्वतः ॥
मणिरत्नोच्चयः सम्पूर्णो दिवाकरसमप्रभः ॥ उत्पाट्य तं जगन्नाथस्तार्क्ष्यपृष्ठे न्यधापयत ॥ तथैव वारुणं छत्रं गरुडोपरि माधव
॥ आरोप्य सत्यया सार्द्धमासीनः सुमनोहरिः ॥ भगदत्तं समाभाष्य पृथिवीं च जगत्पतिः ॥ प्रतस्थे द्वारकां वीरो वियन्मार्गे
ण वैकुंठः ॥ सुवर्णकांचनश्चापि छत्रं स मणिपर्व्वतं ॥ केशवं सत्यया सार्द्धं हेलया खेचरो वहत ॥ क्षणेन द्वारकां प्राप केशवः परवीरहा ॥ मुदं स लेभे शनकैर्ब्बान्धवैश्च तथा गणैः ॥ एवं कालिमहामाया कालिका या जगन्मयी ॥ विष्णुश्च जगतां नाथं परापरगतिं हरिं ॥ जगत्कारणकर्त्तारं ज्ञानगम्यं जगन्मयं ॥ सम्मोहयत्येव तथा स्वं तु रागविरागवान ॥ स्वं तु गृ
ह्णाति मित्राणि ह्यमित्राणि निहन्ति च ॥ नारी तु सुरो रमते द्वन्द्वे नापि च युज्यते ॥ इति वः कथितं विप्रा यथासीन्नरको बली
॥ यथा च बलवांश्चाभूद्यथा चास्य विचेष्टितं ॥ आराधितो यथा ब्रह्मा वाणं तु च्छार्थं भौमिना ॥ किमन्यद्विरवोस्ति त
त्यच्छ्रोतुं द्विजोत्तमाः ॥ ॥ इति श्रीकालिकापुराणे नरकोपाख्याने एकचत्वारिंशोऽध्यायः ॥ ४१ ॥ ॥
॥ ऋषय ऊचुः ॥ कथं गिरिसुता काली वभूव जगतां प्रसूः ॥ दाक्षायणी त्यक्ततनुः कथमाप हरं पतिं ॥ कथमर्द्धशरीरं सा

का०पु
१०१

जहार त्वपिनाकिनः॥ एतन्नः परकृतां सम्यक् कथयस्व महामते॥ ॥मार्कण्डेय उवाच॥ शृणु ध्वं द्विजशार्दूल यथा
दाक्षायणी सती॥ भूत्वा गिरिसुता पूर्व्वं यथार्द्धं म भवत्तनुं॥ यथा त्यज्य तनुं देवी पूर्व्वदाक्षायणी सती॥ तदैव मेनसा ग
कृते मेनकां हिमवद्गिरिं॥ यदा हरेण सहिता दक्षकन्या हिमाचले॥ विक्रीडे च तदा तस्या मेनकाभूड्ढितैषिणी॥ तस्या महः
सुतास्या मि न्याधाय मनसि द्विजाः॥ त्यक्त्वा प्राणां तदा देवी भूत्वा हिमवतः सुता॥ यदा दाक्षायणी प्राणान् दक्षकोपाज्जहौ पु
रा॥ तदैव मेनका देवी पाविराधयिषुः शिवं॥ महामाया जगद्धात्रीं योगनिद्रां सनातनीं॥ मोहनीं सर्व्वभूतानां शरण्यां सर्व्व
कामिनां॥ अष्टम्यां उपवासन्तु कृत्वा [illegible] सा नवमि तिथौ॥ मोदकैर्ब्बलिपिष्टैश्च पायसैर्गन्धपुष्पकैः॥ चैत्रेमासि समारभ्य स
प्तविंशति वत्सरात्॥ तावत्सं पूजयामास पुत्रार्थिन्यान्वहं पुरा॥ गंगायामोषधिप्रस्थे कृत्वा मूर्त्तिं महीयसी॥ कदाचित्सा निः
राहारा कदाचित्साधृतव्रता॥ शिवा विन्यस्तमनसा स प्तविंशति वत्सरान्॥ निनाय मेनकादेवी परमां मूर्त्तिमिच्छती॥ सप्त
विंशति वर्षान्ते जगन्माता जगन्मयी॥ सुप्रीताभवदत्यर्थं प्राह प्रत्यक्षतां गता॥ ॥देव्युवाच॥ यन्प्रार्थितं त्वया देवि मन्त्र
स्तत्प्रार्थया धुना॥ [illegible]स्यते वाहं तत्सर्व्वं वांछितं यत्कृतं भवेत्॥ ततः सा मेनका देवी प्रत्यक्षं कालिकां तथा॥ दृष्ट्वैव प्रणनामाथ
वचनं चेदमब्रवीत्॥ देवि प्रत्यक्षतो रूपं तव दृष्टं मयाधुना॥ त्वामहं स्तोतु मिच्छामि प्रसन्ना यदि मे शिवे॥ ततः सा मातरित्युक्त्वा

रामः
१०१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालिकासर्व्वमोहिनी॥ वाहुभ्यांवाहुवृत्ताभ्यां मेनकापरिषस्वजे ॥ततः सामेनकादेवी कालिकांपरमेश्वरीं॥ तुष्टावववाग्भिरिष्टा
भिः शिवांप्रत्यक्षतस्थितां॥ ॥मेनकोवाच॥प्रियन्तीं जगद्धाम चण्डिकांलोकधारिणीं॥ प्रणमामिजगद्धात्रीं सर्व्वकामार्थदायि
नीं॥ प्रनमामिजगद्धात्रिं सर्व्वभ्रमणकारिणीं॥ नित्यानन्दांज्ञानमयीं योगनिद्रांजगत्प्रसुं॥ प्रणमामिसदाशुद्धां विधिसौरिशिवा
त्मिकां॥ मायामयींमहामायां भक्तशोकविनाशिनीं॥ साकल्यवनितातुष्टां नमामिश्रीचितिंशिवां॥ सत्वोद्रिक्ताया भवित्रीह नित्या
नित्याचापिप्राणिनांवुद्धिरूपा॥ साजुवन्धं छेदहेतुर्यतीनां कस्तेशक्त्योमादृशीभिः प्रभावः॥ यात्वंसामन्त्रासिद्धिरुक्तिस्तथावाक्
रुद्धिर्यायद्दीर्घरूपास्त्वमेका॥ हिंसायाऽथर्व्व वेदस्यत्वं नित्यं कामंत्वं ममेष्टं विधेहि॥ नित्यानित्यैर्भाव हीनैः परस्थैस्तन्मात्रस्थै
र्यहीतेभूतवर्गैः॥ तेषांशक्तिस्त्वंसदानित्यरूपा,स्तेजोरूपायोग्यमुक्तोसमर्था॥ क्षितिद्धुरित्री जगतांत्वमेव, त्वमेवनित्याप्रकृ
तिः परस्मात्॥ यथावशः क्रियते ब्रह्मरूपः सात्वंनित्यात्मप्रसीदाद्यमातः॥ त्वंजातवेदासततशक्तिरुग्रा, त्वंदाहिकासूर्यकर
स्यशक्तिः॥ आमोदिकात्वंवरुचन्द्रिकाया,स्तांत्वामहंस्तौमिनमामिचाम्बिकां॥ येषांयोषित्प्रियाणांत्वं विद्यात्वं चोर्द्ध्वरेतसां
॥वांछात्वंसर्व्वजगतां मायाचत्वंतथाहरेः॥ यानेकरूपाणिविधायनित्यं,सृष्टिस्थितिहानिमपिहकर्त्री॥ ब्रह्माच्युतस्था
णुशरीरहेतुः सात्वंप्रसीदाद्यपुनर्न्नमस्ते॥ ॥मार्कण्डेयउवाच॥ततःसाजगतांमाता कालिकापुनरेवहि॥ उवाचमे

ला६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का०पु
१०२

नकां देवि वाञ्छितं वरयेत्पुनः ॥ ततः सा प्रथमं पुत्रं शतं वव्रे यशस्विनी ॥ वीर्यवन्नायुषायुक्तमृद्धिसिद्धिसमन्वितं ॥ पश्चा
त्तथैकां तनयां स्वरूपां गुणशालिनीं ॥ कुलद्वयानन्दकरीं भुवनत्रयभूषितां ॥ ततो भगवती प्राह मेनकां मुनिसन्निभां ॥
स्मितपूर्वं तनोतस्याः पूरयन्तीमनोरथं ॥ ॥देव्युवाच॥ शतं पुत्राः संभवन्तु भवत्या वीर्यसंयुताः ॥ तत्रैको बलवान्मुख्य
:प्रथमं संभविष्यति ॥ सुता च तव देवानां मानुष्याणोश्च राक्षसां ॥ हिताय सर्व्वजगतां भविष्याम्यहमेव ते ॥ श्री सुरवप्
सवानीत्यं तथा नित्यं पतिव्रता ॥ अम्लानरूपसंपन्ना सुभगा च भविष्यति ॥ एवमुक्त्वा जगद्धात्री तत्रैवान्तरधीयत ॥
मेनका च सुतां लब्ध्वा स्वस्थानं प्रविवेश ह ॥ ततः काले तु संप्राप्ते मेनाकमचलोत्तमं ॥ पक्षेण सह यो ह्यापि सिन्धुमध्ये प्रव
र्तते ॥ मेनका सुषुवे देवी देवेन्द्रस्पर्द्धया गतं ॥ अन्यानु न शतं पुत्रान् क्रमात्सा सुषुवे सह ॥ महावीर्यान्महासत्वा संपन्ना
न्सर्व्वतो गुणैः ॥ ततः सा कालिका देवि योगनिद्रा जगन्मयि ॥ पूर्व्वं त्यक्तसतीरूपा जन्मार्थं मेनकाययौ ॥ समयस्या तु रूप
णा मेनकाजठरे शिवा ॥ सम्भूय समुत्पन्ना सा लक्ष्मीरिव सागरात् ॥ वसन्तसमये देवी नवम्यां मृगयोगतः ॥ अर्द्धरात्रे
समुत्पन्ना गङ्गेव शिवमण्डलात् ॥ ततस्तस्यां तु जातायां सुप्रसन्ना भवद्दिशा ॥ अनुकूलाववौ वायुः गम्भिरोगगन्धिनः शु
भः ॥ वभूव पुष्पवृष्टिश्च तोयवृष्टिपरस्तथा ॥ जज्वलुश्चाग्नयः शान्ता जगद्दुश्च घनाघने ॥ तस्यां तु जायमानायां सर्व्वं स्वस्थम

एमः
१०२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पद्यत॥ तन्तु दृष्ट्वा तथा जातां नीलोत्पलदलानुगाम्॥ श्यामां सा मेनका देवी मुदमायाति हर्षिता॥ देवाश्च हर्षमतुलं प्रा
पुरत्र सुकृत्सुकृः॥ जुष्टुवुश्चान्तरीक्षास्तु गन्धर्व्वाप्सरसोगणाः॥ तान्तु नीलोत्पलदलश्यामां हिमवतः सुता॥ का
लीति नाम्ना हिमवा.नाजुहाव कृते दिने॥ वान्धवास्तु सुसन्ताना नाम्ना सा पार्व्वतीति च॥ कालीति च तथा नाम्ना कीर्त्ति
ता गिरिनन्दिनी॥ तत्रस्था ववृधे देवी गिरिराजगृहे शुभा॥ गङ्गेव वर्षासमये शरदीवाथ चन्द्रिका॥ एवमानन्ददिवसं वा
र्द्धमाना चारुतां मुहुः॥ दध्रे वानुदिनं काली चन्द्रविम्बकलानिव॥ सा वाल्यभावमापन्ना क्रीडन्ति कालिका च ह॥ सखीभिः
प्रापविपुलां कालिन्दीव सरिद्विजैः॥ पङ्कुगणास्तांस्तु वदेवीं पूर्व्वजन्मवशं गताः॥ स्वयमीयुर्द्विजश्रेष्ठा प्रावृषं कालिका
यथा॥ अतिचन्द्रामसत्त्वगुणाः सा देवी देवकन्यकाः॥ रूपैरप्सरसः सर्व्वा गीतैर्गन्धर्व्वकन्यकाः॥ सा वाल्य एव सततं वन्धुव
र्गप्रिया शुभा॥ गुणैः सुवध्वा पितरं मातरं वाप्यतोषयत्॥ मातुः प्रियकरी नित्यं पितृपूजारता परा॥ सर्व्वदा भ्रातृसंहि
ता जगन्माता भवत्तदा॥ सर्व्वदा सा जगन्माता देवकन्या उपस्थिते॥ पितुः समीपे वसती कालिन्दीव विभावसोः॥ अथै
कदा तां निकटे निधाय भगवान्गिरिः॥ तनये श्च समसङ्ख्यस्थितः परमकौतुकात्॥ अथागतस्तत्र मुनिर्न्नारदः स्वर्गा
लोकतः॥ हिमवन्तं समासीनं सुतैः सार्द्धं ददर्श सः॥ अपश्यन्निकटे कालीं कालिन्दीमिव सर्व्वजाम्॥ ज्योत्स्नामिव सुधांशोस्तु

का०पु
१०३

सम्यग्गृह्यांशरन्निशि॥ पूजितस्तेन गिरिणा कृतासनपरिग्रहः॥ नारदः प्रथमं शैलं वृत्तान्तं पर्य्यपृच्छत॥ ततो विदितवृत्तान्तो
नारदो मेनकापतिं॥ उवाच हर्षयन्वाक्यं मुनिर्व्वाक्यविशारदः॥ एषा ते तनया हृद्या यासुधांशोर्विव र्द्धते॥ अत्याकलाशैल
राजसर्व्वलक्षणशालिनी॥ शम्भोर्विभर्त्रिदयिता सानुकूला सदा हरे॥ तस्य चित्तं वशे चैषा करिष्यति तपस्विनी॥ स चाप्येनां
मृते जायां नान्यामुद्वाहयिष्यति॥ एतयोर्यादृशः प्रेम कयोश्चिन्नैव तादृशः॥ भूतो वा भविता वापि नाधुनात्र प्रवर्त्तते॥ अनयासु
रकार्याणि कर्त्तव्यानि बहूनि च॥ अनयैव गिरिश्रेष्ठ अर्द्धनारीश्वरो हरः॥ भविष्यति च सौहार्दा ज्योत्स्नायेवामृतात्मनः॥ श
रीरार्द्धं हरस्यैषा हरिष्यति निजास्पदे॥ सुवर्णगौरी स्वर्णाभा तपसा तोषिते हरे॥ विद्युद्गौरीति चेयं गौरी तत्पुत्री भविष्यति॥ गौ
रीति नाम्ना पश्चात्तु ख्यातिमेषागमिष्यति॥ नान्यस्मै त्वमिमां दातुं मनः कर्त्तुमिहार्हसि॥ इदं चोपांशु देवानां न प्रकाशीकरि
ष्यसि॥ ॥मार्कण्डेय उवाच॥ इति तस्य वचः श्रुत्वा देवर्षेर्न्नारदस्य तु॥ उवाच हिमवान्वाक्यं मुनिं प्रति विशारदः॥ श्रूयते
त्यक्तसङ्गस्य महादेवो यतात्मवान्॥ तपश्चोपांशु तपति देवानामप्यगोचरः॥ स कथं ध्यानमार्गस्थः परब्रह्मार्पितं मनः॥
भ्रंशयिष्यति देवर्षे तत्र मे संशयो महान्॥ अक्षरं परमं ब्रह्मन्प्रदीप्तं कालिकोपमः॥ अन्तः पश्यति सर्व्वत्र नतु वाह्यं निरी
क्ष्यते॥ इति संश्रूयते नित्यं किन्नराणां मुखाद्द्विजा॥ कथं स तादृशं स्वान्तं शक्तो भ्रंशयितुं हरः॥ विशेषतस्तु श्रूयते दास्याय

रामः
१०३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तयासमंहरः॥समयंहृतवानपूर्वंतन्मेनिगदतःशृणु॥नत्वामृतेन्यांवरयेदाक्षायणीसतिप्रिये॥भार्यार्थंसंग्रहिष्यामिस
त्यमेतद्ब्रवीमिते॥इतिसत्यासमंतेनपुरैवसमयःकृतः॥तस्यामृतायांसकथंस्त्रियमन्यांग्रहीष्यति॥ ॥नारदउवाच॥ना
त्रकार्याविचारचिन्तागिरिराजसुतांप्रति॥एषासतीसमुत्पन्नाहरस्यैवनसंशयः॥ ॥मार्कण्डेयउवाच॥इत्युक्त्वास
तुदेवर्षिर्नारदस्तुयथासती॥मेनकायांसमुत्पन्नासर्वंतत्प्रोक्तवान्गिरौ॥ततस्सर्वंप्रवृत्तान्तंनारदस्यमुखाद्गिरिः॥श्रुत्वा
सपुत्रदारस्तुतदानिःसंशयोभवत्॥ततःकालिकथांश्रुत्वानारदस्यमुखात्तदा॥लज्जयाधोमुखीभूत्वास्मितविस्तारिता
नना॥करेणतांतुसंस्पृश्यपोन्नमय्यमुखंगिरिः॥मूर्ध्निशश्वदुपाघ्रायआसनेस्विन्यवेशयत्॥ततस्तांपुनरेवाहनारदःशैल
पुत्रिकां॥हर्षयन्गिरिराजंतुमेनकांतनयैःसह॥सिंहासनेनकिंत्वस्याःशैलराजभवेत्तव॥शंभोरुरुःसदैतस्याआसनंतुभ
विष्यति॥हरोरुमासनंप्राप्यतनयातवसत्तमं॥नान्यत्रकुत्रचित्तुष्टिमासनेप्राप्स्यतेगिरे॥इतिवचनमुदारंनारदःशै
लराजंत्रिदिवमगमदुक्त्वातत्क्षणाद्देवयोनिः॥गिरिपतिरितिचित्तंहर्षयन्मोदयुक्तोविशदवलयासोस्वान्तरंपद्म
गर्भः॥ ॥इतिश्रीकालिकापुराणेद्विचत्वारिंशोध्यायः॥४२॥ ॥मार्कण्डेयउवाच॥एतस्मिन्नन्तरेशंभुः
सिप्रंत्यक्त्वातदाश्रमं॥गंगावतारमगमत्हिमवत्प्रस्थमुत्तमं॥यत्रगंगानिपतितापुराब्रह्मपुराच्युता॥ओषधिप्रस्थनगरेस्था

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दृरेसाउहन्तमः ॥ तत्र भर्गः स्वमात्मानमक्षरं परमात्परं ॥ चेतोऽत्तानमयं नित्यं ज्योतिरूपं निराकुलं ॥ जगन्मयं प्रदीपाहं द्वैतहीना
विशेषतं ॥ एकाग्रं चिन्तयामास भगवान्वृषभध्वजः ॥ हरेर्ध्याने परे तस्मिन् प्रथमे ध्यानतत्परः ॥ अभवन्केचिदपरे नन्दिभृं
ग्यादयो गणाः ॥ द्वास्था भूता महाभागा ये पूर्वं द्वारियोजिताः ॥ तावन्तोऽपि गणास्तत्र नैव किञ्चन पूजितं ॥ तेषां संश्रयते सर्वं निःश
ब्दाः संस्थितास्ततः ॥ अन्येऽपि तत्र क्रीडन्ति गणा दूरान्तरस्थिताः ॥ कुसुमैश्च दलैर्भक्तैः गिरिप्रसवनोदकैः ॥ रत्नानि च विचिन्व
न्तोऽभूमिभागे गिरेस्तदा ॥ स गणान्नु ततो दृष्ट्वा गिरिराजो तुरंगतः ॥ स्वस्थानमोषधिप्रस्थात् निःसृत्य सहितो गणैः ॥ पूजार्थमुपत
स्थे स यथायोग्यं तथाऽर्चयत ॥ सर्वोऽपि शंभुस्तस्याज्ञाम्परयाश्रद्धयायुतः ॥ प्रतिजग्राह कूटस्थो गंगां शीर्षे यथा पुरा ॥ पूजितस्तेन
सहसा गिरिराजेन वृषध्वजः ॥ उवाच ध्यानयोगस्थः स्मयन्निव जगत्पतिः ॥ ॥ श्रीईश्वर उवाच ॥ तव प्रस्थे तपस्तप्तुं रह
स्यमहमागतः ॥ न यथा कोऽपि निकटं समायाति तथा कुरु ॥ त्वं महात्मा जगज्जात मुनीनां च सदाश्रयः ॥ देवानां दानवानां च
यक्षकिन्नररक्षसां ॥ सदाश्रयो द्विजातीनां गंगापूतश्च नित्यदा ॥ त्वत्पुरस्यास्य निकटे प्रस्थे गंगावतारणं ॥ आश्रितोऽहं गिरि
श्रेष्ठ तद्गोप्यं कुरु मां प्रति ॥ इत्युक्त्वा जगतां नाथः तूष्णीमास वृषध्वजः ॥ गिरिराजस्तदा शंभुं प्रणम्येदमब्रवीत ॥ पूजितो
स्मि जगन्नाथ त्वयाहं परमेश्वर ॥ स्वागतेनाद्य विषये मितह्रतं किमस्मि मे ॥ महता तपसा त्वं हि दैवैर्यत्नपरस्थितैः ॥ न प्राप्य

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सेजगन्नाथ सत्वंस्वयमुपस्थितः॥मत्तोधन्यतरोनास्तिनमत्तोन्योस्तिपुण्यवान्॥यद्भवानद्यमत्पुरस्थितयसेसमुपस्थि
तः॥देवेन्द्रादधिकंमन्येस्वात्मानंपरमेश्वर॥सगणेनत्वयायस्मा्त्पावितंदर्शनं कामकारतः॥इत्युक्त्वागिरिराजोथस्ववेश्मपुन
रागमत्॥नियतात्मापरीवारान् गणानपितदासुरान्॥अद्यप्रभृतिनोगन्ताकोपिगंगावतारणं॥मच्छासनंनहिविनायो
गन्तादण्डेयशतं॥इतितान्सनियम्याथतिलपुष्पफलाधिकं॥समादायस्वतनयासहितोयात्हरान्तिकं।अथगत्वाजगन्नाथं.
हरंध्यानपरंतदा॥नमयामासतनयांकालिंसर्वगुणान्वितां॥तिलपुष्पादिकंयच्चतत्तदाग्रेनिधायसः॥अग्रेकृत्वासुतांशं
भुमिदमाहसशैलराट्॥भगवंस्तनयेयंमेत्वामाराधयितुंव्रति॥समादिष्टासमानीतात्वराराधनकांक्षिणी॥सखीभ्यां
सहनित्यंत्वांसेवतामेवशंकर॥अनुजानीहिसेवार्थंमयितेयद्यनुग्रहः॥अथतांशंकरोपश्यत्.प्रथमारूढयौवनां॥फुल्ले
न्दीवरपत्राभां.पूर्णचन्द्रनिभाननां॥समग्रनीलकेशौघप्राप्तवेशविजृंभितां॥कंबुग्रीवांविशालाक्षीं.चारुकर्णयुगोज्ज्वलां॥
मृणालायततपर्यन्तबाहुयुग्मविराजितां॥राजीवकुड्मलप्रख्यघनपीनोच्छ्रितस्तनीं॥विलग्नांक्षीणमध्याञ्च.रक्तपाणितल
द्वयीं॥स्फुलत्पद्मप्रतीकाश.पादयुग्ममनोरमां॥मध्येक्षीणांमहासत्वां.वक्त्रेस्मुलघनोज्ज्वलीं॥जघनंनाममनाशामं.बिम्बोष्ठी
वविभूषितां॥सुवृत्तंचारुजंघाग्र्यां.त्रिगंभीरांषडुन्नतां॥सर्वलक्षणसंपूर्णांत्रिषुलोकेषुदुर्ल्लभां॥ध्यानपञ्जरनिर्द्वन्द्व.मुनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मानसमप्यगां दर्शनाद्गृशनेशान्तौ योषित्कुलशिरोमणिं ॥ तां दृष्ट्वा तपसां नित्यं ध्यानानाञ्च मनोहरं ॥ विघ्नहेतुं चानुरागवर्द्धः
नीं कामरूपिणीं ॥ गिरिराजस्य वचनात्तन्नयानस्य शंकरः ॥ पर्यासनाये जगद्गुरुः गौरवादपि गौरवः ॥ उवाचेदं तव सुता सखिः
भ्यां सह शैलराट् ॥ नित्यं मे सेवयायन्ता निर्भीताप्यवतिष्ठतु ॥ एवमुक्त्वा तु तां देवी शैवाद्ये जगद्गुरुहरः ॥ इदमेवमहद्धैर्यं यद्वि
घ्नानहि विघ्नयेत् ॥ निर्विघ्नस्थानमासाद्य यत्नः क्रियते द्विजैः ॥ स विघ्नो विघ्नहेतुं यः परिभूय प्रवर्त्तते ॥ तन्महत्वं चतपसां
धीरत्वं वतपस्विनां ॥ ततः स्वपुरमायातो गिरिराट्परिवारकैः हरश्च ध्यानयोगेन परं चिन्तयितुं स्थितः ॥ कालीसखिभ्यां सहिता प्रत्य
हं चन्द्रशेखरं ॥ सेवमाना महादेवं गमनागमने स्थिता ॥ कदाचित्सहिता काली सखिभ्यां शंकराग्रतः ॥ वितन्वती सुभंगीतं पंचः
मं चातनोत्तदा ॥ कदाचित्कुशपुष्पादि समिद्धारिहरा सह ॥ सखीभ्यां स्थानसंस्कारं कुर्वन्ती नावसत्तदा ॥ कदाचिदग्रे नियता स्थि
ता चन्द्रभृतो मुखं ॥ वीक्ष्यन्ती चिन्तयामास सकामा चन्द्रशेखरं ॥ यदा कार्य्ये प्रसुम्ना त्वग्रा तदा तत्कर्म वेष्टते ॥ कृतिहीना यथा सा
तु तदैवा चिन्तयेद्धरं ॥ कदानिमिषभूतेशः कर्णापानिगृहीतवान् ॥ कदा मया समं यत्ना ज्ञानासद्भावभावनः ॥ इति चिन्ताः
परा काली स्वप्नेपि परमेश्वरं ॥ आर्त्तं गत्वैव सततं कथा चिन्तनतापरं ॥ अग्रे तदा यदा काली प्रध्यापतिमहेश्वरं ॥ तदा तद्देदभः
तेशः स्वांनिसर्गपरिस्थितां ॥ किन्तु सा भगतेवीर्यैर्भूतिदेहेतितां तदा ॥ नागरी जिरिशः काली भार्य्यार्थे विघ्नतत्वतां ॥ महादेवोपि

तां दृष्ट्वा तदा देवेदमचिन्तयत ॥ कथमेषा तपश्चर्य्यां वृतं कुर्य्यात्गिरेः सुता । कृतव्रतां ग्रहीष्यामि गर्भबीजविवर्जितां ॥ कालीं
भार्य्यां सुदयितां योनिजामतिभूषितां ॥ व्रतेन वाथ संस्कारे गर्भबीजं विमुच्यते ॥ तस्माद्व्रतं यथा काली कुर्यान्नु युज्यते तिन्त ॥
मार्कण्डेय उवाच ॥ इति संचिन्त्य भूतेशः सदा ध्यानं समास्थितः ॥ ध्यानाशक्तस्य तस्याथ नान्या चिन्ता व्यजायत ॥ कालीत्वनुदि
नं शंभुं भक्त्याभ्यशमसेवत ॥ विचिन्तयन्ती सुदिता तस्य रूपं महात्मनः ॥ हरोध्यानपरः काली नित्यं प्रत्यक्षत स्थितं ॥ वि
स्मृत्य पूर्वं विज्ञान्य पश्यन्नपि न पश्यति ॥ एतस्मिन्नन्तरे देवा तारकोनाम दैत्यराट् ॥ ववाधे सर्वलोकानां व्रह्मणो वरद ७८
र्पितः ॥ वशीकृत्य स लोकांस्त्रीं स्वयमिन्द्रो वभूव ह ॥ विद्राव्य सकला देवान् दैत्यान्स्तत्पदे च ॥ स्वयं नियोजयामास देव
योनिषु वाप्यसौ ॥ न यमः स्वेच्छया लोका तस्मिन्राजनि यच्छति ॥ न स्वेच्छया तथा सूरो लोकांस्तत्पतितं द्रुयात ॥ चन्द्रस्तु न
स्मात्ता विवृं तस्य कुर्वन् स्वरश्मिभिः ॥ वायुना सह संगम्य तत्सेवां विदधे निशं ॥ सदसौगन्ध्य गांभीर्य्य शैत्यस्निग्धत्व सं
युतः ॥ तं वीजयन्पूर्ववो वायुः शासनात्तारकस्य च ॥ धनदोपि यथासारं धनमादाय यत्नतः ॥ सावधानं तस्य सेवां म करो
त्तारकेच्छया ॥ अग्निस्तस्याभवत्सुदः शासनात्तारकस्य च ॥ यं जनात्तथ भोज्यानि च केतस्य च्छया तदा ॥ निर्ऋतिस्तस्य स
ततं सहितः सर्व्वराक्षसैः ॥ अश्वान्गजान्वाहनानि कारयामास साध्वसात् ॥ नृत्यभिरप्सरोभिश्च स्तुवद्भिर्गन्धर्वादि

का.पु
१०६

भिः॥ गायमानैश्च गन्धर्वैः सम्बक्रीडे सुरान्द्विषान्॥ एवं स सर्व्वलोकानां त्रिष्वप्यथ विलोकयन्॥ लोकेषु सारान्सारांश्च देवा
नामप्यथाग्रहीत्॥ तेन ते बाधिता देवाः सर्वे शक्रपुरोगमाः॥ ब्रह्माणं शरणं जग्मुर्नेतारं नाथमुत्तमं॥ ते प्रणम्यामराः सर्व्वे पुरु
हूतपुरोगमाः॥ इदमूचुर्महात्मानं सर्व्वलोकपितामहं॥ ॥देवा ऊचुः॥ लोकेश तारको दैत्यो बलेन तव दर्पितः॥ निरस्या
नाहवादस्मा दिवयानस्थमगृहीत्॥ रात्रिन्दिवं बाधते स्मान्यत्रतत्रस्थितान्वयं॥ पलायिताश्च पश्यामः सर्व्वास्वाशासु तारकं॥
अग्निर्यमोथ वरुणो निरृतिर्वायुरेव च॥ तथा मनुष्यधर्म्माश्च सर्व्वैः परिकरैर्युतः॥ एते तेनार्द्दिता ब्रह्मन्नतनवस्तुस्यशाः
सनात्॥ अतिच्छाकार्यनिरता सर्व्वे तस्यानुजीविनः॥ यावन्त्यो वनिताः स्वर्गे ये चाप्सरसां गणाः॥ तान्सर्व्वान्प्रगृही दैत्यः सा
रं येषु यच्च यत्॥ न यज्ञाः संप्रवर्त्तन्ते न तपस्यन्ति तापसाः॥ दानधर्म्मादिकं किञ्चिन्न लोकेषु प्रवर्त्तते॥ तस्य सेनापतिः
पापः क्रौञ्चो नामातिदारुणः॥ स पातालतले गत्वा बाधते हनिशं प्रजाः॥ तस्मात्त्वं तारकेनेदं सकलं भुवनत्रयं॥ हृतं सर्व्वं
जगत्त्राहि पापात्तस्मात्पितामह॥ वयं च यत्र स्थास्याम स्तत्स्थानं विनिर्देशय॥ स्वस्थानाद्बाधितास्तेन लोकनाथ पितामह॥
त्वन्नो गतिश्च शास्ता च त्वं त्राता पिता प्रसूः॥ त्वमेको भुवनानाञ्च स्थापकः पालकः कृती॥ तस्मान्न यावत्तारकाख्य वह्नौ रामः
दग्धाः प्रजायते॥ न [illegible] भवाम स्तदा कर्त्तुं भवतो युज्यते षुना॥ ॥मार्कण्डेय उवाच॥ सुराणां वचनं श्रुत्वा ब्रह्मा लोकपिः १०६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तामहः ॥ प्रत्युवाच सुरान्सर्वान् स्तत्कालसदृशं वचः ॥ ॥ ब्रह्मोवाच ॥ ममैव वरदानेन तारकाख्यः समेधितः ॥ न मत्त
स्तस्य मरणं युज्यते त्रिदिवौकसः ॥ युष्माकं स्वप्रतीकारः कर्तव्यः प्रतिकर्म्मणि ॥ किन्तु सम्यक् न शक्नोमि प्रतिकर्तुं प्रचोदि
तः ॥ तस्माद्यथा तारकाख्यः स्वयमेष्यति संक्षयं ॥ तथा यूयं संविदध्वमुपदेशं करस्व हे ॥ न मया तारको वध्यो न तथा व
नमालिना ॥ न हरेन तथा वध्यो नान्येनापि सुरेन वै ॥ एवं वध्येव वरो दत्तो मया तस्मै तपस्यते ॥ तथा यत्र उपायोस्ति कुर्व
न्तु सुरसत्तमाः ॥ सती दाक्षायणी पूर्वं त्यक्तदेहा स्वजन्मने ॥ आगच्छ मेनकां देवी शैलराजस्य योषितं ॥ तां समुत्पादयामास मे
नकाजठरे गिरिः ॥ लक्ष्मीमिव पुरा धात्रा भृगुः सुतनयोमम ॥ तामवश्यं महादेवः कुर्यात्पाणिगृहीतिकां ॥ यथा सन चिरात्त
स्यामनुरक्तो भवेत्सुराः ॥ तथा विधध्वं सुतरां त्वत्तेजः प्रतिकर्तृ ततः ॥ तमूर्द्धरेतसं शंभुं सैव प्रत्युत्तरेत्तसे ॥ कर्तुं समर्था
नान्यास्ति तथा कापि बला बला ॥ तत्तेजः प्रच्युतं यत्तु तस्माद्यो जायते सुतः ॥ स एव तारकाख्यस्य हन्ता नान्यस्तु विद्यते ॥ सा
सुता गिरिराजस्य सांप्रतं रूढयौवना ॥ तपस्यन्तं गिरिप्रस्थे नित्यं पेय्य सते हरं ॥ वाक्याद्धिमवतस्सानु काली नाम्नाति सेवते ।
सखीभ्यां सह धर्म्मज्ञे ध्यानन्तु परमेश्वरं ॥ तामग्रतो वर्तमानां त्रैलोक्यवरवर्णिनीं ॥ ध्यानाशक्तो महादेवो मनसापि च नेक्ष
ते ॥ यथा समीहते भार्यां काली सच्चन्द्रशेखरः ॥ तथा कुरुध्वं त्रिदशा नचिरादेव यत्नतः ॥ स्थानेतद्भवता स्वर्गे तस्मात्तारको

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धयं॥ निवर्त्तयिष्ये संगम्य गच्छध्वं विगतज्वराः॥ इत्युक्त्वा सर्वलोकेशः तारकाख्यमुपस्थितः॥ उपसंगम्य वचनं समाभा
ष्येदमब्रवीत्॥ भो भो तारक मा स्वर्गे राज्यं त्वं परिशाधि भो॥ तदर्थं न तपस्तप्तं स मयेभ्य वता पुरा॥ वरो नापि दत्तो दत्तो न
मया स्वर्गराजतः॥ तस्मात् स्वर्गं परित्यज्य क्षितिराज्यं समाचर॥ देव भोग्यानि तत्रैव संभविष्यन्ति ते सुर॥ इत्युक्त्वा सर्वलो
केशस्तत्रैवान्तरधीयत॥ तारकस्तु दिवं त्यक्त्वा मर्त्यलोकमथागात्॥ तत्रैव संस्थितान्देवान्बाधते तु स नित्यशः॥ इ
न्द्रकरं वहं चक्रे निदशस्थं महाबलः॥ तमिन्द्रः स ततं देव भोग्यानि वितरेन्मुदः॥ स एवमानः क्षणेना भूत्सन्तोषयितु
मीश्वरः॥ एवं तेनार्द्दिता देवा मत्त्विना परिपीडिताः॥ वितुधारूपदेशेन यत्नं चक्रुर्दरान्वये॥ तत इन्द्रोथ गुरुणा संग
म्य कृतनिश्चयः॥ कुसुमेषुं समाहूय वचनञ्चेदमब्रवीत्॥ ॥ इन्द्र उवाच॥ त्वयेदं पाल्यते विश्वं त्वया विश्वं प्र
सूयते॥ त्वं बुलविष्णुरुद्राणां प्रीतिहेतुः पुराभवत्॥ ब्रह्मा प्रीत्या मया पूर्वं मगच्छ्वरितव्रत॥ सावित्री माधवो लक्ष्मी स
तीं दक्षायणीं हरः॥ ताः प्रीत्या यस्त्वयातेषां देवज्ञानां तथा कृथाः॥ त्वयेव कुरुते प्रीतिः कामप्राणिभ्यतां सदा॥ नत्तो दन्यः क
श्चित्स्वर्गे पाताले वा धरातले॥ प्रियः प्राणभृतां काम सततं जगतां मतः॥ देव दानव यक्षाणां रक्षसां मानुषस्य च॥ त्वं पा
लकश्च कर्त्ता च हृदये च प्रवर्त्तते॥ तस्मात्त्वं सर्वजगतां हितायकुरु तेधुना॥ देवानां यक्षगन्धर्वमानुषाणां तथान्मतां॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मार्कण्डेय उवाच ॥ ॥ एतच्छ्रुत्वा वचस्तस्य शक्रस्य मकरध्वजः ॥ देवराजमुवाचेदं सुप्रीतं तद्वचो मतेः ॥ यत्राहमीशितः श
क्र सत्वं मे विदितं त्वया ॥ तस्मान्ममोचितं शक्र करिष्ये तन्निदेशय ॥ यश्चैव वाणा मद्दत्तेपि पुष्पमयाममम ॥ चापस्तथा
पुष्पमयः शिञ्जिनी भ्रमरालिजा ॥ रतिर्मे दयिता जाता वसन्तः सचिवो मम ॥ यन्त्रा मे मलयो वायुर्मित्रं मम सुधानिधिः ॥ से
नापतिर्मे शृङ्गारो हावभावाश्च सैनिकाः ॥ सर्वे मे मृदवः क्रूरा अहं चापि तथाविधिः ॥ यद्येन युज्यते कार्यं धीमांस्तत्तेन यो
जयेत् ॥ मम योग्यन्तु यत्कर्म तस्मात्तन्मे नियोजय ॥ ॥ इन्द्र उवाच ॥ यत्कार्यं कर्तुमिच्छामि भवतात्त्वं मनोभव ॥ तत्ते स
मुचितं कर्म तस्मिन्समर्पितो भवान् ॥ कृतकर्मापि तत्र त्वं कृतीवापी मनोभव ॥ त्वदन्यैः किन्तु दुःसाध्यं तत्त्वां तत्र नियोज
ये ॥ श्रूयतां हितपस्यन्तं ध्यानस्य वृषभध्वजे ॥ गिरेर्हिमवतः प्रस्थे निराकांक्षो वधूकृते ॥ तं पितुर्वचनात्काली त
पस्यन्तं निषेवते ॥ सखीभ्यां सहिता नित्यं हरस्यानुमते धुना ॥ आरूढयौवना नाम्नानु स्त्रीरत्नमयी सुन्दरी ॥ ध्यानासक्तो म
हादेवो नेहते मनसापि च ॥ सानुरागो यथा तस्यां जायते वृषभध्वजः ॥ तथा यतस्व देवानां हिताय जगतामपि ॥ तया सहय
था रेमे सानुरागो वृषध्वजः ॥ तथेतया गिरिजया रमतां त्वत्कृतेन वै ॥ तस्याः कृते नु यतते जः प्रत्युत स्याद्धरस्य वै ॥ ततो
योजयते सोस्मात्तारकाद्धरिष्यति ॥ ॥ मार्कण्डेय उवाच ॥ ततः स देवराजस्य वचः श्रुत्वा मनोभवः ॥ प्राप्तकालश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न

का०पु
१०८

संस्मार शापं ब्रह्मकृतं पुरा॥ संध्यां प्रति विधाता स्वदक्षांस्त्वं परीक्षितुं॥ कामोहनस्तु ष्यगणैस्तदा तमशपद्विधिः॥ शंभुनेत्रा
ग्निदग्धास्त्वं भविष्यसि द्विजोत्तमाः॥ यदा कुर्याज्जिरिसुतां हरः पाणिगृहीतिकां॥ तदा भवान् शरीरेण गमिष्यति समग्रतां
॥इति स्मृत्वा विधेः शापं भीतोपि मकरध्वजः॥ स्वस्त्री चक्रे शक्रवाक्यात्काल्यायोजयितुं हरे॥ इदं च वचनं प्रोचे त्कालसदृशं पु
नः॥ करिष्ये त्वद्वचः शक्र हरं संगमयाम्यहं॥ काल्या गिरिजया सार्द्धं दाक्षायण्या यथा पुरा॥ किं त्वेकं मम साहाय्ये कर्त्ता हि ह
रमोहने॥ यदा सम्मोहनेनाहं हरं संमोहयामि च॥ तदा कुसुमहायत्वं स्वस्थश्चाप्यायय स्व मां॥ प्रविश्याहं सुरभिणा न वि
राछ्छ्रं आश्रमं॥ विधाय पूर्वं मनसो विकारं हर्षणेन तु॥ सम्मोहनेन तु दृढं मोहयिष्ये वृषध्वजं॥ स्मरिष्यसि ध्रुवं संप्राप्ते काले
न मां स्वपालने॥ अहं गच्छामि सहितं तत्कर्तुं वलसूदन॥ ॥मार्कण्डेय उवाच॥ इत्युक्त्वा स जगन्नाथ मदनः शंकरा
श्रमं॥ शक्रोपि त्रिदशान्सर्वान् निदमाह वचस्तदा॥ यूयं कुरुध्वं साहाय्यं यत्र याति मनोहरः॥ तत्र तत्रानुगम्यैव गामये
न स्त्ववोधय॥ यदा सम्मोहनेनायं सम्मोहयति शंकरं॥ तदाहमपि यास्यामि तत्रैवाधयमां सुराः॥ इत्युक्त्वास्तेन शक्रेण देवा
जग्मुर्मनोभवं॥ सोपि गत्वा यत्र हरो गंगावतरणे गिरौ॥ हिमभारकृतस्थाणौ सुरभिश्चान्वयोजयत्॥ ततस्तत्र गते समयं कुः
सुरभौ तस्य लक्षणं॥ विकसन्त्रिचिरादेव तरुगुल्मलतासु च॥ पुष्पिताः किंशुकास्तत्र वकुलाः केशरास्तथा॥ सर्वांसि च सपद्मानि पु

रामः
१०८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फुल्लाः समन्ततः ॥ ववौ वायुस्तु गंभीरो गन्धितः पुष्परेणुभिः ॥ शनैः शनैः सुखकरो वर्षयन्ति वकाननं ॥ यक्षिणश्च मृगाश्चै-
व ये चान्ये प्राणधारिणः ॥ सिद्धाश्च किन्नराश्चैव छन्दभावं वितेनिरे ॥ चूताः कुसुमितास्तत्र नवस्तवकभूषिताः ॥ अशोकपाट
लाश्चैव नागकेशरकारणाः ॥ सविकारा गणाश्चासन् शंकरस्य तदा द्विजाः ॥ प्रत्यक्षतो न नेमुस्ते विकारं शंभुसाध्वसात्
॥ भ्रमन्ति स्म तदा तत्र भ्रमराः कुसुमोद्भवं ॥ पिबन्तो वकुशस्तुते गुंजंतः सह जायया ॥ एवं प्रवृत्ते सुरभौ स्मरः सोपि गुण
ः सह ॥ हावभावयुतस्तत्र प्रविवेश हरान्तिके ॥ मदनः सगणस्तत्र निवसंश्चिरमेव हि ॥ न दृष्टवांस्तथा शंभोश्छिद्रं येन
प्रवेक्ष्यते ॥ यदा वा प्राप्तविवरस्तदा भयविमोहितः ॥ नाग्रे समभवत्तस्य मदनो रतिवारितः ॥ एवं यातस्तस्य कालः प्रभू
तो द्विजसत्तमाः ॥ निरूपयन्नवाप छिद्रं तस्य गतेः तथा ॥ ज्वलज्ज्वालाग्निसंकाशं भास्वत्त्रदससमप्रभं ॥ ध्यानस्थं शंकरं
कोवा समासादयितुं क्षमः ॥ अथैकदा गिरिसुता कालीतस्याभवत्पुरः ॥ कृत्वा परिष्टिं कर्त्तुं वै सखिभ्यां प्रणता स्थिता ॥ शं
करोपि तदा ध्यानं त्यक्त्वा क्षणमास्थितः ॥ योऽजयत्स्वगणान्हेत्य ज्योतिश्चिन्ताविवर्जितः ॥ तच्छिद्रं प्राप्य मदनः प्रथ
मं हर्षणेन तु ॥ वाणेन हर्षयामास पार्श्वस्थं वृन्दकोरवरं ॥ शृंगारश्च तदा भावैः हावैश्च सहितो हरं ॥ जगाम कामसाहाय्य
कृद्वसुरभिना सह ॥ हर्षणेनाथ हर्षितः शृंगारादैन्द्रिये चितः ॥ शंकरो मदनः कान्त्या साद्भुतः सर्वलोकयत ॥ तन्तु प्राप्य विव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रं कामः पुष्पं चापे त्वयोजयत् ॥ सम्मोहनं पुष्पभूतं पुष्पमालाविवर्द्धितं ॥ तस्यासीद्दक्षिणे पार्श्वे रतिः प्रीतिस्तु वामतः ॥ पुष्पेषु
शरं तूणीरं पौष्पमादाय सुन्दरः ॥ आकर्णपूर्णं तं पुष्पं चापमाकृष्य संयतः ॥ यदा मनोभवो वायुस्तदा तेन समुपेयिवान्
॥ सन्धिते पुष्पबाणे तु गिरिजां चन्द्रशेखरः ॥ जातेन्द्रियप्रविकारः सन् जिघृक्षुः संगमेऽभवत् ॥ अमराः शक्रसहितास्तदा
सर्वे विपद्गताः ॥ समीक्ष्य मनोभवं मेने सुरकृत्यं निवेशितं ॥ अथ संस्मृत्य संगम्य निगृह्य विकृतिं तदा ॥ इन्द्रियस्य म
हादेवः सहसैवं विचिन्तयेत् ॥ योनिजां गिरिजां काली तपोव्रतविवर्जितां ॥ कथं संगमकामोऽहं धर्तुमिच्छामि वै हठात् ॥ तपो
व्रतपरीताङ्गीं तपश्चरणसत्कृतां ॥ स्वयमेव ग्रहीष्यामि सतीं दाक्षायणीमिव ॥ कथं विकृतकालोऽहं मनिच्छन्निव सांप्रतं ॥ के
नापि चाहं हृष्ट इव चिकीर्षुः संगमेऽभवत् ॥ एवं विकारहेतुं स निश्चिन्वन्निन्द्रियस्य तु ॥ पुरोऽवलोकयामास सहितेषुं मनो
भवं ॥ जज्वाल जज्वलप्रख्यः तं विधर्तुं प्रसह्य तु ॥ एतस्मिन्नन्तरे ब्रह्मा विज्ञातः समयः सुरान् ॥ दृष्ट्वा यथा नाजगाम तत्स
माजमनुग्रहात् ॥ ततः स कुपितो दृष्ट्वा संधितेषुं मनोभवं ॥ कामोऽयं समयं ज्ञात्वा सम्मोहयितुमिच्छति ॥ मनो मे स्ववशं
कर्तुं तन्नयामि यमक्षयं ॥ एवं विचिन्त्य ललाटनेत्रोऽद्राक्षीत्ततेजसा ॥ वर्द्धितो ज्वलनोऽभूत्वा क्रोधो नेत्रात्ससार ह ॥ तं क्रोधं
निः सरिष्यन्तं जातवेदसरूपिणं ॥ ज्ञात्वा कामस्त्यतान्वाणान् पौष्पान्वै परि संहृतवान् ॥ शक्तिं प्राणांस्तथा स्थानमाहृ रामः
त्यापालयद्विधिः ॥ उत्सारयामास तदा वसन्तमपि पितामहः ॥ निजशक्त्या तदा शंभुः क्रोधाद्दृष्ट्वा मनोभवं ॥ यथाकाश १०२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गतादेवाः क्रुद्धं दृष्ट्वा महेश्वरं ॥ प्रसीद जगतान्नाथ कामक्रोधं परित्यज ॥ त्वयायथा पुरासृष्टः शंभुरूपेण कर्म्मणा ॥ येन त्वा
योजितं कर्म्म यत्कृतोतिमनोभवः ॥ तस्मात्वंमदने शंभुः क्रोधाग्निमुपसंहर ॥ प्रसीद सर्वभूतेश भक्त्यात्वत्प्रणतावयं ॥ इति
स्तुवद्तांतेषां मम प्राणांस्तदानलः ॥ ललाटचक्षुः संभूतो भस्माकार्षीन्मनोभवं ॥ दग्ध्वा कामं तदा वह्निः ज्वालामालातिदीपि
तः ॥ संस्तंभितोथ विधिना हरं गन्तुं स शाकत ॥ महादेवोथ तद्भस्म मनोभवशरीरजं ॥ आदाय सर्वगात्रेषु भूतिलेपं तदा
करोत् ॥ लेपशेषाणि भस्मानि समादाय तदा हरः ॥ सगणोस्मद्दृषे कालीं विधाय विधिसम्मते ॥ ज्वलत्क्रोधानलं शंभोर्द्दस
न्तं सकलान्सुरान् ॥ वडवारूपिणं वक्त्रे देवानां पुरतस्तदा ॥ वडवा स्तानमददेवाः सौम्या ज्वालामुखीशुभा ॥ दृष्ट्वानिर्विघ्नमः
नसो वभूवुः पूर्वपीडिता ॥ वडवान्तां समादाय तदा ज्वालामुखीं विधिः ॥ सागरं प्रययौ लोकहिताय जगतां पतिः ॥ गत्वा
च सागरं वेला प्रावावप्रति पूरितः ॥ यथावत्तेन विधिपूर्वद्धः समयश्चातिदर्शयत् ॥ अयं क्रोधो महेशस्य वडवारूपधृक्त्वया
ज्वालामुखः सदा धार्य्यो यावन्न निरयाम्यहं ॥ यदा त्वामहमागम्य वदाम्सिरितांपते ॥ तदा त्वया परित्याज्यः क्रोधोयं वडवा
मुखः ॥ भोजनं भवतो तोयमेतस्यानु भविष्यति ॥ यत्नादेवं विधार्य्योयं यथा नो याति तेन्तरं ॥ इत्युक्तो ब्रह्मणा सिन्धुरंगीच
केतदाकूवं ॥ ग्रहीतुं वडवावक्त्रं शंभोश्चाशकामपालं ॥ ततः प्रविष्टे जलधौ पावको वडवामुखः ॥ कार्य्यं चानिदहन्नस

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म्यं ज्वालामालातिदीपितं ॥ यदादहच्छंभुनेत्रदहनो मदनं तदा ॥ अभवत्सुमहान्शब्दो येनाकाशः प्रपूरितः ॥ तेन शब्देन महता
कामदाहेक्षणेन च ॥ सखीभ्यां सह भीताभूत् काली शोकयुता तदा ॥ तेन शब्देन हिमवान्सहितो विस्मितास्तदा ॥ तदागिरिर्जि
गामासु गतां काली हराश्रमं ॥ तां तत्र कालीं तनयां भयशोकाकुलां शुभां ॥ रुदतीं शंभुविरहाद् दाससादाचलेश्वरः ॥ आसा
द्य पाणिना तस्या मार्ज्जयन्नयनद्वयं ॥ मा भैषीः कालि मा रोदीरित्युक्त्वा तां तदाग्रहीत ॥ क्रोडे कृत्य सुतां स्वां तु हिमवानच
लेश्वरः ॥ स्वमालयमथानिन्ये सांत्वयामास चार्द्दितां ॥ अन्तर्हिते हरे काली विरहात्तस्य सन्ततं ॥ निवसंती पितुर्गेहे शुशो
च च मुमोह च मशैलाधिराजोप्यथ मेनकापि मेनाकमुख्यापि सखीभिस[...]ना ॥ तां सांत्वयां चक्रुरदीनसत्वां हरं विस
स्मार तथापि नासा ॥ ॥ इति श्रीकालिकापुराणे द्विचत्वारिंशोध्यायः ॥ ४२ ॥ ॥ मार्कण्डेय उवाच ॥ अथ देवमुनिर्या
तो हिमवन्मन्दिरं तदा ॥ नियोजितो वलभिदा नारदः कामचारवान् ॥ संगतः पूजितस्तेन धरेशेन महात्मना ॥ तं समुत्सृज्य
रहसि कालीं नामाससाद ह ॥ आसाद्य कालीं स मुनिः संबोध्य ज्ञानशालिनीं ॥ उवाच देववचसा तथ्यं सर्वेषां जगतां हितं ॥ ॥
९ नारद उवाच ॥ शृणु कालि वचो मह्यं सत्यं तदवधारय ॥ सेवितः स महादेवस्त्वयेह तपसा विना ॥ अनुरक्तोपि तेन त्वां म
हर्ष्येवो विसर्ज्जवान् ॥ त्वामृते शंकरो नान्यां कृतिं यां संग्रहीष्यति ॥ त्वञ्चापि नान्यं दयितं ग्रहिष्यसि विनेश्वरं ॥ तस्मात्त्वं तपः

तदागिरिः २

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सायुक्त्वा चिरमाराधयेश्वरं ॥ तपसा संस्तुतोंत्वान्तु सद्वितीयां करिष्यति ॥ मन्त्रोयं तस्य सुभगे शङ्करं त्वं येन सेविरात् ॥ आराधि
तस्तेप्रत्यक्षो भविष्यति महेश्वरः ॥ ॐ नमः शिवायेति च सर्वदा शंकरप्रियं ॥ विचिन्तयन्ती तद्रूपं नियमस्याखण्डस्वरं ।
मन्त्रं जपन्त्वं गिरिजे तेन तुष्टो भवेद्धरः ॥ एवमुक्त्वा तदा काली नारदेन महात्मना ॥ क[illegible]मनुमेने सा हितं तथ्यं च तद्वचः
॥ अनुमान्य तपस्तप्तुं तदा काली च नारदः स्वर्गं जगाम तस्याश्च निश्चिता भून्मतिर्व्रते ॥ अथ याते देवमुनौ काली स्वाम्बां तु
मेनकां ॥ तपः श्रद्धां समाचख्या वात्मनो हरसंगमे ॥ ॥ काल्युवाच ॥ तपस्तप्तुं गमिष्यामि मातः प्राप्तुं महेश्वरं ॥ अनुजानीहि मां
गन्तुं तपसे च तपोवनं ॥ तपं करिष्यन्तं मे पितुरावेदय द्रुतं ॥ यावन्न देहजननिर्भूते शोविरहाग्निना ॥ इति श्रुत्वा वच
स्तस्या मेनका शोककर्षिता ॥ आलिंग्य स्वसुतां मूर्ध्नि मा तपः कुरु वत्से मे ॥ गृहेपि पुत्रि मामा त्वं सुतयो या हि कर्कशं ॥
तपः सहेत्सुनेगात्रं शक्तेनेन कलेवरं ॥ वनवासश्च ते पुत्रि निष्ठः शङ्करगौरपि ॥ तस्मात्त्वं संपरित्यज्य वनवासोद्भवक्ले
शः ॥ आत्मनो ह्यनुरूपेन तपस्त्वं कुरु यच्छितं ॥ ॥ मार्कण्डेय उवाच ॥ मातुः सा वचनं श्रुत्वा गिरिजा दीनमानसा ॥ इत्युवा
च तदा वाक्यं तपोयत्ने परापुसः ॥ मा निषेधय मां मातस्तपसे च तपोवनं ॥ प्रच्छन्नमपि यास्यामि नानुज्ञाता यद्यहं त्वया ॥ ॥
मेनकोवाच ॥ गृहेषु देवास्सन्तन्ते ब्रह्मविष्णुमहेश्वराः ॥ तस्माद्गृहेषु देवार्चां कुरु पुत्रि यथेप्सितान् ॥ स्त्रीणां तपोवनगतिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तेश्चकृत्वास्वामिनो विना तस्मात्त्वं पुत्रि माकार्षीः तपो याहि वनं प्रति ॥ यन्तो निरस्ता तपसो वनं गन्तुञ्च मेनका ॥ उमेति तेन सा मेतिः
नाम प्रापत्तदा सती ॥ अवज्ञाय तदा मातुर्वचनं हिमवत्सुता ॥ सखीभ्यां ज्ञापयामास पितरं तपसो यमं ॥ स तु ज्ञात्वा गिरिपतिः
तपसे वरितो यमं ॥ दुहितुश्चानुमेने च नातिहृष्टमना इव ॥ सानुज्ञाप्य तदा तातं यत्र देवो मनोभवः ॥ शंभुना पुपयेतत्रैः
गंगावतरणं प्रती ॥ गंगावतरणो नाम प्रस्थो हिमवतः स्व ॥ हरशून्यामथ ददर्शी काल्या तत्रैव सा सदा ॥ यत्र स्थित्वा पुरा शंभु
ध्यानवानभवद्धशं ॥ तत्र क्षणं तु सा स्थित्वा बभूव विरहार्दिता ॥ हा हरेति क्षणं तत्र रोदमाना गिरेः सुता ॥ विललापातिदुः
खार्त्ता चिन्ताशोकसमन्विता ॥ क्षणं विलप्य सा काली स्मृत्वापूर्वोद्भवं तदा ॥ हा हर हरस्य सा मोहमवाप कमलेक्षणा ॥ ततः
तः स्थिरेण सा मोहं धैर्यात्संस्तभ्य भाविनी ॥ नियमस्य सा भवत्तत्र दीक्षिता हिमवत्सुता ॥ अथ मन्त्रिपमंतस्या बभूव फलभोज
नं ॥ वर्षापञ्चतपा चिन्ता शांभवीशांभवजपः ॥ यत्नोपे हरमभि श्रुत्वा ऽथ तु हिंक्षुचतु कृतं ॥ वह्निं संस्थाप्य तं ग्रीष्मे नीः
ग्मांभुस्तत्र पंचमः ॥ हस्तान्ते रेव तु वेदीन कृत्वा वैश्वानरेक्षिता ॥ ततस्थस्य सूर्यविम्बं वीक्षन्ती वल्कलोत्सुकाः ॥ शी
ष्मति त्वतो यमध्ये शिशिरे जलशायिनी ॥ प्रथमं फलभोगेन द्वितीयं तोयभोजनं ॥ तृतीयं तु स्वयं याति वृक्षपर्णादि भोज
नं ॥ क्रमेन तु तदा पर्णं निरस्य हिमवत्सुता ॥ निराहारव्रती भूता तपश्चरणनिन्नया ॥ आहारे त्यक्तपर्णाभूद्यस्माद्धिमवतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सुता ॥ तेन देवैरपर्णेति. कथिता पृथिवीतले ॥ पश्चात्तपवृते नैव तोयानाश्च प्रवेशनैः ॥ एकपादास्थिता सा तु. वसन्तेः
हिमवत्सुता ॥ षडक्षरं जयन्तीसा. चिरन्तेपेतपोमहत् ॥ चीरवल्कलसंवीता जटासंघातधारिणी ॥ कृशाङ्गी चिन्तयेत्सक्ता
जिगाय तपसानुनीत् ॥ तां तपश्चरतोशक्तो रक्षशंकरः स्वयं ॥ आप्यायतिस्म च तदा भयाद्व्रतिहर्षितः ॥ एवं तस्या तप
स्यन्त्याश्चिन्तयन्त्या महेश्वरं ॥ त्रीणि वर्षसहस्राणि जग्मुः कालात्तपोवने ॥ सा त्रिवर्षसहस्रान्ते. ब्रह्मणा संस्कृता स्वयं ॥
देवेन विधिना देवी हरयोग्या तदा भवत् ॥ षष्ठिवर्षसहस्राणि. यत्र तेपे तपो हरः ॥ तत्र क्षणमथोसित्वा चिन्तयामास
भाविनी ॥ नियमस्था महादेवी किं मां जानाति नाधुना ॥ येनाहं सुचिरं तेन नानुयातास्तपोरता ॥ लोके नाम्यत्र गिरिशोः
११५ नियतं मुनिभिः रितं ॥ सर्वज्ञः सर्वगो देवो. हरो देवैर्निगद्यते ॥ सर्वगस्तु स सर्वज्ञः सर्वात्मा सर्वहृद्गगः ॥ सर्वभूतिपुः
देदेवः सर्वभावनभावनः ॥ सतीवन्मेनका माता. यदिवोहं वृषध्वजे ॥ सा तु रक्ता न चान्यस्मिन्. प्रसीदत्वत्र शंकरः ॥
यदि नारदवचनात् मन्त्रोयं स्यात्षडक्षरः ॥ यदि भक्त्या मया जप्तं हरस्तेन प्रसीदतु ॥ सत्यं यदि तपस्तप्तं सत्यं वाराधिः
तो हरः ॥ सत्यं मेव व्याप्तितपो हरस्तेन प्रसीदतु ॥ ॥ श्रीमार्कण्डेय उवाच ॥ एवं विचिन्तयन्ती सा. यदातिष्ठद्गराश्र
मे ॥ अधोमुखी दीनवेगा. जटावल्कलमण्डिता ॥ तदेव ब्राह्मणः कोपि. ब्रह्मचारी यतव्रतः ॥ कृष्णाजिनोत्तरीयेण धृत

६३

का०पु०
११२

दण्डकमण्डलुः ॥ ब्राह्म्या श्रियादीप्यमानः सुवर्णगौरश्चो भनः ॥ जटाभिः परिवीताभि सूद्भिक्तस्तनुदेहभृत् ॥ उपस्थि
तः तदा कालीशंभुर्ब्राह्मणरूपधृक् ॥ आगत्य प्रथमं काली. सम्भाषा च तदा द्विजः ॥ ज्ञातु पुत्र्यस्ततो रागं श्रोतु मिच्छंस्तु तद्वचः
वाग्मी विविधवाक्येन पप्रच्छ गिरिजां तदा ॥ ॥ ब्राह्मण उवा ॥ का त्वं कस्यासि कल्याणि किमर्थं विजने वने ॥ तपश्चर
सि दुर्द्धर्षं. मुनिभिः प्रयतात्मभिः ॥ न बाला त्वं नापि वृद्धा. तरुणी नासि शोभना ॥ कथं पतिं विना तीव्रं. तपश्चरसि साम्प्रतं
किं वा तपस्विनी भद्रे. कस्यचित्सहचारिणी ॥ तपस्विनः सपुण्यादि. सम्माहन्तु गतो त्यजत् ॥ एतन्मम समाचक्ष्व यदि गुह्यं
भवेन्न ते ॥ यदि ते हृदये मन्युः कश्चिद्वसति सम्प्रति ॥ तदाचक्ष्व समर्थोस्मि. तमहं वापि वाधितुं ॥ इत्युक्तास्तेन विप्रेन गि
रिजा युतिजां सखीं ॥ तस्यान्तर प्रदानाय कटाक्षेणान्वयोजयत् ॥ सा सखी वचनात्तस्या विजया ब्राह्मणं तदा ॥ प्रोवाचेदं व वा५
चस्तथ्यं वीक्षन्ती गिरिजामुखं ॥ एतस्य गिरिराजस्य तनयेयं द्विजोत्तम ॥ ख्याता च पार्वती नाम्ना कालीति च सुशोभना ॥ द
क्षेयन च केनापि शंकरं वृषभध्वजं ॥ वांछन्ती दयितं तीव्रं. तपश्चरति वै पतिं ॥ त्रीणि वर्षसहस्राणि तपस्वरीति भा
विनी ॥ न शंकरो गिरिसुतां. नद्याप्युपपद्यते ॥ शंकरो गिरिशो देवः सर्वगः परमेश्वरः ॥ इति स्म गद्यते देवैर्महर्षिभि रामः
स्तपोधनैः ॥ किमेनां स न जानाति. किन्नासौ नास्ति वा गिरौ ॥ इति चिन्ताविवर्णाय मध्यनो लभते सुखं ॥ अप्रार्थितः त्व ११२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मनया दयसे यदि मे सखी ॥ तदेनां शंकरेणाद्य त्वं सङ्गमय सुव्रत ॥ इति तस्या वचः श्रुत्वा ब्रह्मचारी तदा द्विजः ॥ स्मयमा
नमिदं वाक्यं हेलया वाच पार्वती ॥ ॥ब्रह्मचार्युवाच ॥ अमोघदर्शने त्वाम्मि हरं चालयितुं क्षमः ॥ किं त्वेकं निगदाम्यद्य
निश्चितं तन्मम शृणु ॥ जानाम्यहं महादेवं तं वदामि शृणुष्व मे ॥ वृषध्वजो महादेवो भूतिलेपजटाधरः ॥ व्याघ्रचर्माम्बु
कश्चैकः सम्वीतो गजकृत्तिना ॥ कपालधारी सर्पौघैः सर्वगात्रे सुवेष्टितः ॥ विषदग्धतलस्याक्षो विरूपाक्षो विभीषणः ॥ अ
व्यक्तजन्मा सततं गृहभोगपविवर्जितः ॥ ज्ञातिभिर्बान्धवैर्हीनो भक्ष्यभोज्यविवर्जितः ॥ श्मशानवासी सततं सत्संगपरिवर्जितः
६६ गर्जभिर्विकटैः स्त्रीस्त्रा भूतौघैः परिवारितः ॥ अङ्गरागरसहीनश्च भार्यापुत्रविवर्जितः ॥ केन वाकारणेन त्वं भर्त्तारं तं स
मीहसे ॥ पूर्वं श्रुतं मया चैतत् तस्यापरमिदं कृतं ॥ श्वशुरेणेनिग नामास्य यष्टिते गृहे राचवते ॥ दक्षस्य दुहिता साध्वी सती वृ
षभवाहनं ॥ वत्रयतिपुरादेवात् संभोगाय रिवर्जितं ॥ कपालिज्ञायति सती दक्षेणापरिवर्जिता ॥ यज्ञे भागप्रदानाय शंभुः
श्चापि विवर्जितः ॥ सा पुत्रेनापमानेन भृशं शोकाकुला सती ॥ तत्याज स्वान् प्रियान् प्राणां स्तया त्यक्तश्च शंकरः ॥ त्वं स्त्रीरत्नं तव
पिता राजा निखिलभूभृतां ॥ तथाविधं पतिं कस्मात् दुग्रेणात पसेहसे ॥ देवेन्द्रो वा धनेशो वा यवनो वाप्यपांपतिः ॥ अग्निर्वानेन्द्र
सुरो वापि स्ववैद्यावश्विनौ च वा ॥ विद्याधरो वा गन्धर्वो नागो वा मानुषोथवा ॥ रूपयौवनसंपन्नः समस्तगुणसंयुतः ॥ स ते योग्यः
पतिः श्रीमान् नुदारकुलसंभवः ॥ येन त्वं वकुरत्नोघ पूरितेन सुविरसजे ॥ मालाप्रवरसंयुक्ते धूपचूर्णाश्ववासिते ॥ मृत्कान्ति

रणसंयुक्ते विस्तृते सुमनोहरे ॥ वरप्रासादगर्भस्थे जांबुनदविचित्रिते ॥ शय्यातले समासाद्य स योग्यस्ते भवेत्पतिः ॥ एवं ज्ञात्वा यथा सु
भगे. यदि वांछसि शंकरं ॥ किं तेन तपोभिः सुतरां. महतं योजयेत्त्वया ॥ ॥ मार्कण्डेय उवाच ॥ इति श्रुत्वा तदा काली ब्राह्मणस्या
प्रियं वचः ॥ स्मितं तं वै जगादेदं. ब्राह्मणं कोपसंयुता । ॥ श्रीकाल्युवाच ॥ न जानामि हरं देवं. त्वं जानासीति भाषसे ॥ वहिर्य
द्दृश्यते तत्र. कथितं द्विजनन्दन ॥ यस्य भावं न जानन्ति सेन्द्रा ब्रह्मादयः सुराः ॥ तस्य त्वं विप्रतनयः शिशुर्ज्ञास्यसि किं भवं ॥ य
स्तु ते भवता नीव. वदता ज्ञापितं लघु ॥ इन्द्रस्तत्तस्य तुल्ये वं भाषसे तन्न दृष्टवान् ॥ तस्मात्त्वन्नो वरं नाह. वरये तं पतिं निः
ना ॥ अन्यदद्य न वक्तव्यं वांछये हरसंगमे ॥ इत्युक्त्वा गिरिजा विप्र. मवलोक्य सखी मुखं ॥ इदमाह तदा काली शंकयोस्तवै तसा
॥ महता विलम्बेनेह. तपसाराधितो हरः ॥ तं ममाग्रे विनिर्भर्त्स्य. निन्दितं वाक्यमुक्तवान् तमहं चापनेष्यामि स्तुतिना को न
सांप्रतं ॥ महात्मना त्वयो निन्दां शृणोति कुरुतेऽथवा ॥ तयोरागं समं पूर्वं. मया तात मुखाच्छ्रुतं ॥ तस्मात्तदपनेष्यामि तं निषेध य
विप्रकं ॥ इत्युक्त्वा सा सखी काली. शंभुसंगतमानसा ॥ आगः प्रवार्यमानाश्च. हरं स्तोतुं प्रचक्रमात् ॥ ॥ काल्युवाच ॥ नमः शि
वाय शान्ताय कारणत्रयहेतवे ॥ निवेदयामि चात्मानं. त्वं गतिं परमेश्वर ॥ विज्ञानसौभाग्यसुहृत्कृतायपुपञ्चहीनाय हि
रण्यवाहवे. नमोऽस्तु नारायणपद्मसंभव. प्रधानबीजाय जगद्धिज्वते ॥ इति स्तुवन्तीं निरखे स द्विजस्तदा वचः किञ्चिदुदीरि
तं पुनः ॥ समीक्ष्य कालीमकरोन्मुखस्तकं. कुधासमावष्ट सखी गिरेः सुता ॥ अयं द्विजः किंचनवक्तुमिच्छन्तु गृहं हरश्चापि न सः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्विदानः॥ निदर्शिमे प्राणहरं हरस्य। निन्दामहं श्रोतुमिहसमाने॥ यावद्वयो वदेस्याहं नश्यतो माधूर्त्ता सखि॥ गच्छामि ताव
हृराय समुत्थिताभिमतप्रिये॥ इत्युक्त्वा सा तया सख्या सहिता हिमवत्सुता॥ प्रतस्थेऽथ समुत्थाय समुत्सृज्य द्विजं हठात्॥ अथ शंभु
र्निजं रूपमास्थाय हिमवत्सुतां॥ तं समुत्सृज्य गच्छन्तीं स्मेरस्मेरमुखोऽन्वयात्॥ अहं हरो महादेवो मां संस्तौषि न वाधुना॥ संमुखी
भव हे कालि समाश्वास यशांकरि॥ इत्युक्त्वा स महादेवो गच्छन्त्यास्याः पुरो गतः॥ प्रसार्य हस्तौ कालीं तु गतिं तस्या निरोधयत्॥
॥सा वीक्ष्य शंभुवदनं तत्क्षणादभवद्रता॥ अधोमुखी नतित्वाच्च चकिते वा गिरेः सुता॥ मन्दस्मप्रीतिलज्जाभिः सा जडेव तं
दाभवत्॥ वक्तुं च नाशकत्किंचिद्विवशु रपि भाविनी॥ मनोरथानां सिद्ध्यात्तु सुधाभिरिव पूरितं॥ शरीरमभवत्तस्या मुदा
पूर्णा द्विजोत्तमाः॥ षष्ठीवर्षसहस्रैस्तु तपःक्लेशमविन्दत॥ या तं क्षणात्समुत्सृज्य सम्वादमुदिता भवत्॥ ता स्ववीक्ष्य स
मुद्धृतो गणाया वृषभध्वजः॥ कामेनाभस्मरूपेण गात्रस्थेनाविमोहितः॥ अथ तां गिरिहोदिकः समेत्य वृषभध्वजः॥ सम्बोधयन्निद
म्वापु वचनं प्रोक्तवान्मुदा॥ नेत्रसुन्दरीमां वक्तुं किंचनापि त्वमीहसे॥ तपःक्लेशं स्मरन्न किं त्वं मह्यं कुप्यसि सांप्रतं॥ अहं त्वया
न२ रिम्यामि त्वामतोऽसुभगे मम॥ स सर्वोऽयं समारम्भस्तपसस्त्वया समं॥ नानुरक्तोऽथ संस्कृत्य भवानपि त्वया प्रिये॥ अधुनास्म्यवतीतो मे
यः कृतः समयो मया॥ तपसे भवती वापि तपसैव सुसंस्कृता॥ मद्विनीतेन नजप्येत नीतेन तपसा तथा॥ मूल्येन महता क्रीतो दासस्त्वं
मां नियोजय॥ त्वदङ्गानां सुस्वरेण जगदानन्दप्रसादने॥ प्रमोक्ष्य वल्कलं गात्राच्चीवांश्च कनिवेशनं॥ हारनूपुरकेयूरकङ्कणादि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विभूषणं ॥ द्रुतं नियोजयस्व मे यदि स्नेहोऽस्ति मादृशि ॥ निर्द्दग्धो यो मया कामो भस्मरूपेण सन्नमे ॥ स्थितो मां प्रति कृत्यैव त्वदग्रे दग्धुमि
च्छति ॥ तस्मादुद्धर मां कामाद् दग्धौरिव मनोरमे ॥ त्वदङ्गामृतपातेन प्रसीद दयिते मम ॥ ॥ इति श्री कालिकापुराणे हरकालिसमागमे
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ ॥ श्रीमार्क्कण्डेय उवाच ॥ इति श्रुत्वा वचः शंभोर्गिरिजातीव हर्षिता ॥ मेने प्राप्तं तदा शंभुं सुन्दरं दयितं पतिं ॥ अथ
प्राह तदा काली सखी वक्रेण शंकरं ॥ यद्यथाभ्यर्थितं वाक्यं श्रोतुमिच्छास्य शंकरः ॥ न संप्राप्नोति मे देव प्रवर्त्तन्ते च सज्जनाः ॥ मर्यादया हरस्त
स्मे पाणिं गृह्णातु शङ्करः ॥ पित्रा दत्ता भवेत्कन्या तपोदत्ता भवेन्न हि ॥ तपसा चेत्प्रदत्ता हि मा तात प्रपस्य दास्यति ॥ तस्मात्त्वं प्रार्थ्य पितरं हिमवन्त
नगेश्वरं वैवाहिकेन विधिना पाणिं गृह्णातु मे हरः ॥ इत्युक्त्वा विररामाथ काली तत्र समन्विता ॥ ॥ मार्क्कण्डेय उवाच ॥ हरोऽपि तत्तद्वचस्तथ्यं य
थार्थ्यं योग्यं तदाग्रहीत् ॥ ततः सगणः शंभुस्तत्रवासं तदकरोत् ॥ गंगावतरणे शैलेऽयथा पूर्वं तथा प्रभुः ॥ काली पितुर्गृहं याता सखीभिः
परिवारिता ॥ नालोकयन्ती मन्दाक्षा गुरूणां वदनं सती ॥ एतस्मिन्नन्तरे सप्त मरीचिप्रमुखान्मुनीन् ॥ चिन्तयामास शशिभृत् कालीं प्रार्थयि
तुं तदा ॥ चिन्तिताः सप्तमुनयः तत्क्षणात्मदनारिणा ॥ आकृष्टा इव केनापि तत्सकाशमुपागताः ॥ तान्मुनीन्ददृशे शंभुः सप्ताग्नीनिव दीपिका
न् ॥ अरुन्धती वशिष्ठस्य कौशसदृशीसदृशेऽस्पतीं ॥ अरुन्धतीं ततो दृष्ट्वा वशिष्ठस्य समीपतः ॥ मेने योषित्कृतं धर्म्मं मुनिभिश्चाप्यवर्जितं ॥ तत
स्ते मुनयः सर्वे समीपस्थं वृषभध्वजं ॥ ददृशुः प्रहर्षेण स्मररागविवर्जितं प्रियं ॥ ॥ ऋषय ऊचुः ॥ प्रवत्यसे ददृशाते स्मुद्ररूपं चन्द्रप्रख्यं चन्द्र खः
णोपशोभं ॥ अन्तः प्रज्ञा भाविनं तन्मुनीनां भागं दृष्ट्वा भाग्यधेयेन शुक्लो ॥ प्रज्ञातत्वं ध्यानयन्त्रं पुरस्तान्नित्यं ध्येयं ध्यायिनां सुप्रकाशं ॥ पूज्ञो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मं २

भूतं वाह्यतत्वेन शम्भोर्योग्यं प्राप्यं धाम शंभोस्तु दारं ॥ इच्छायस्यै वाग्भावं सुनेत्रं त्राणाय स्यादागमः स्तूर्यन्तु त्वं ॥ तत्वामेदं स्थानसर्वः
स्थानित्यं नमत्या स्तुवन्तन्नमः शंभुदेह ॥ प्रकाशनत्य ॥ अथ मामिदागतः स्थितस्स मस्तेयई देवनेता ॥ सोस्माकं स्तु प्रथमं सुसिद्धो हर
स्य शक्त्या विषतो ललाट ॥ यः प्रधानात्मकः सत्वरजोध्यां तमसान्वितः ॥ पुरुषः सर्वजगतां संहरोन प्रसीदतु ॥ इतिसंस्तुत्य देवेशं मुनयो
विनमानयाः ॥ ऊचुर्विकिमर्थं भवता स्मृतास्तेनो निगद्यतां ॥ तेषां तद्वचनं श्रुत्वा शङ्करः प्रहसन्निव ॥ जगादतान्मुनीन्सर्वान्नवभाष्यवपृ
थक्पृथक् ॥ ॥शंकर उवाच ॥ हितायसर्वजगतां संभोगायात्मनस्तथा ॥ दारान्ग्रहीतुमिच्छामि तथासंतानवृद्धये ॥ साहाय्यन्त ग्रकुर्व
न्तुभवन्तो ममसांप्रतं ॥ मदर्थे तनयीं काली याचनानु हिमालयं ॥ महनात एषा काली सांप्रतिं लब्धमिच्छता तो ग्रहीष्येतु विधिना तस्मा याचतु
ते गिरिं ॥ यथानत्था स्वयं शैलः कालीं दातुं समुत्सहे ॥ यथानथा विधध्वं तत् पूयवाग्विभवान्विताः ॥ ॥मार्कण्डेय उवाच ॥ हरं संबोध्य मुनयोः या
स्यान्द्धिगिरिराजगृहं ॥ तेन तत्पूजितास्तत्र तमूचुर्मुनयो गिरिं ॥ यश्चन्द्रशेखरो देवो देवदेवश्च यो मतः ॥ शान्तोनुग्रहने शक्तो यस्य कोऽजगतां पतिः
यः संहरति सर्वाणि जगन्ति प्रलयोद्भवे ॥ योविभूतिप्रदे भक्ते नानारूपमनोहरः ॥ स ते दुहितरं कालीं भार्यां मादातुमिच्छति ॥ यदिप
श्यसि संयोग्यं वरं त्वद्दुहितुः समं ॥ तदा प्रयच्छ तनयां कालीं शशिभृते गिरे ॥ ॥मार्कण्डेय उवाच ॥ इत्युक्तस्तैर्गिरिपतिर्हर्षं स्वहृदय
स्थितं ॥ दुहितुश्च प्रियं ज्ञात्वा प्राप मुदमगात्तदा ॥ आहवेदं प्रकाशेणा युष्माभिस्त्वहमागते ॥ पालितोमुनिशार्दूलैः पूरितश्च मनोरः
थः ॥ दास्यामि शंभवे पुत्रीं युष्माभिः प्रार्थितस्त्वहं ॥ पूर्वमेव तपतज्ञात येश्च पतिरीहितः ॥ धातुर्नियोजनमिदं कोन्यथाकर्तुमुत्सहे ॥ को
न्यथाकर्तुमुत्सहे ॥ कोन्यः प्रार्थयितुं शक्तः सुतां मम विना हरात् ॥ हरनाम गृहीता या तामन्यः कः समुद्वहेत् ॥ हरं गृहीत्वा मनसा नान्यं कापी

का०पु हवांछति ॥ इत्युक्त्वा मेनया सार्द्धं सुतां दातुं स्वयं भवे ॥ अंगीकृत्य विसृष्टास्ते मुनयो जग्मुरीश्वरं ॥ ते सर्वे मुनयो माता मरीचिप्रमुखा द्विजाः ॥ शै
११५ लराजो यदा वत्स तदमुष्मै ददनो रपे ॥ हिमवत्तनयां स्वात्तं तुभ्यमुत्सहते हर ॥ यदिदानीं त्वया कर्त्तुं युक्तं ज्ञेयं क्रियतां मुनेन तत् ॥ अस्माभिश्चाप्यनुजानीहि हरं
शंभुं निज्ञास्पदं ॥ मिलितं ज्ञात्वा हरः साधु मुदितस्तान्विसृष्टवान् ॥ यथायोग्यं समाभाष्य क्रमादेवकेशो मुनिः कालीविवाहावसरं पूयमायात माः
प्रति ॥ इति वापि हरेणानः प्रशुत्य माघयोग्ययुः ॥ अघोन्यान्यप्रियतनया वृत्वा कृत्वागतागतं ॥ समय्याकारयामास विवाहाय हरो गिरिं ॥ माधवे मासि
पंचम्यां सितपक्षे गुरोर्दिने ॥ चन्द्रे चोत्तरफाल्गुण्यां भरण्यां देवे स्थिते रवौ ॥ आगता मुनयस्तत्र मरीचिप्रमुखाः पुनः ॥ हरेणामन्त्रिताः सर्वे ब्रह्माद्याः सक
लासुराः ॥ यथा च सर्वे दिक्पाला मुनयश्च तपोधनाः ॥ शच्या सह तथा शक्रो ब्रह्माण्योपायासुमातरः ॥ नारदश्चागतस्तत्र देवर्षिबृन्दाः सुत्ताः ॥
एतैः परिकरैः सार्द्धं गणैरप्यन्वितः सुरैः ॥ कन्याविवाहविधिना गिरिपुत्रीं हरोऽग्रहीत् ॥ विवाहे गिरिणा शंभोः संपाद्येऽनन्तरोस्थिताः ॥ तेजा मुनयस
न्नद्धाश्चालंकारास्तदा भवन् ॥ द्विभुजो भूत्महादेवो जटाकेशान्समागतां ॥ शिरस्थितश्च नुरवाणः सोर्द्धेषा ज्वलितो भवत् ॥ ललाटे नेत्रयभूक्ष
तपास्तं महार्घ्यकं ॥ विचित्रवसनं व्याघ्रकृत्तिवासास्तदा द्विजाः ॥ विभूतिलेपोभूत्तस्य सुन्निमलयोद्भवः ॥ वारुरूपो हरस्तत्र बभौ वाद्भुतदर्शनः
ततो देवाः सगन्धर्वाः सिद्धविद्याधरोरगाः ॥ विस्मयं परमं प्राप्य हरं दृष्ट्वा तथाविधं ॥ हिमवान्मुदितश्चासीत् सह पुत्रैश्च मेनया ज्ञात्यैश्चाप्यः
सुमुकु हरं दृष्ट्वा तथाविधं ॥ इदं ब्रह्मा तत्र जगौ हरं दृष्ट्वा मनोहरं ॥ सर्वं शिवकरं यस्मात्तस्माद्यस्या भवन्सुराः ॥ तस्माच्छिवोऽयं लोके पुनास्मा
न्नाधिकः शिवः ॥ मेत्त्वरस्तु मायुक्तमीदृशायः स्मरे सदा ॥ सततं तस्य कल्याणं वांछितं च भविष्यति ॥ एवं काली महामाया योगनिद्रा जगत्प्रसूः ॥ पूर्वं दक्ष रामः
याणी भूत्वा पश्चाद्गिरिसुता भवत् ॥ स्वयं मत्वा तिसती कालीसम्मोहितं हरं ॥ तथा त्युग्रतपस्तप्ते हिताय जगतां शिवा ॥ एवं सम्मोहयामास कालिका चंद्रशेखरं ॥ इत्य ११५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्कथितं सर्व्वं त्यक्त्वा देहं सती यथा। हिमवत्तनया भूत्वा पुनः प्राप महेश्वरं॥ इदं यः कीर्त्तयेत् पुण्यं कालिकाचरितं द्विः
जाः। नाधयो व्याधयस्तत्र दीर्घायुः स च जायते॥ इदं पवित्रं परम मिदं कल्याणवर्द्धनं। श्रुत्वापि सकृदेवेदं शिवलोका
य गच्छति॥ यः श्राद्धे श्रावयेद्विप्रा कालिकाचरितं महत्। पितरस्तस्य कैवल्यमाप्नुवन्ति न संशयः॥ यः श्रावयेद्ब्राह्मणा
नां सन्निधौ वासमागतः। तत्र स्वयं हरो गत्वा शृणोति सह मायया॥ इति वः कथितं पुण्यं सर्व्वपापप्रणाशनं। युष्माकं शीने
ते वास्मनू यत्तत्पृच्छन्तु सत्तमाः॥ ॥इति श्रीकालिकापुराणे कालीहरसमागमविवाहं समाप्तं॥ ४४ ॥ ॥ऋ
षय ऊचुः॥ विचित्रमिदमाख्यानं स्मरकालीहरागमं। पुण्यं पापहरं नित्यं श्रुतिसौख्यकरं परं॥ भूयः कथय सर्व्वस्यः
कालीतत्त्वं मुत्तमं। कथं जहार गौरीवा कथं भूताथ कालिका॥ केन वा कारणे नास्य कस्मा गौरीत्वमागता। तत्तः कथ
य तत्वेन मुनिश्रेष्ठ द्विजोत्तमः॥ ॥मार्कण्डेय उवाच॥ इदं तु महदाख्यानं कथयिष्यामि वो द्विजाः। महर्षयश्च शृण्वन्तु
तत्वेन वदतो मम॥ एतदेवं पुरा राजा सगरः पृष्टवान्मुनिं। स तं यथा समाचष्ट तद्वो मुनिगदाम्यहं॥ पुरा भूत्सोमवंशे
षु सगरो नाम पार्थिवः। धर्मज्ञो मान्वलवान्दक्षः सर्व्वशास्त्रार्थपारगः॥ सोभूदेकरथेनैव जित्वा सर्व्वान्महीभुजान्। सार्व्व
भौमो नरपतिः सर्व्वराजगुणैर्युतः॥ तं प्राप्तराज्यं राजानं सगरं पार्थिवोत्तमं। स राजा जयितुमन्यर्घ्यं मुनयः समुपागताः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राच्योदीच्या महात्मानो दाक्षिणात्याश्च पश्चिमोत्तराः ॥ मुनयो ब्राह्मणाश्चान्ये कूपं द्रष्टुं समागमन् ॥ आगतेष्वथ सर्व्वेषु महात्माः
ज्वलनोपमः ॥ और्वो नाम मुनिः श्रीमानागतो नन्दितुं नृपं ॥ तमागतं मुनिं दृष्ट्वा ज्वलन्तमिव पावकं । सपर्यया महत्यानुगँव ग
न्तमपूजयत् ॥ पाद्यमाचमनीयञ्च दत्त्वार्घपुरोगमं । निवेशयामास तत मुनिश्रेष्ठं वरासने ॥ उवाच च महात्मानमौ
र्व्वं स सगरो नृपः । प्रणम्य च यथायोग्यं कुशलं तं इति द्विजं ॥ स च प्राह मुनिश्रेष्ठो नरराज सदा मम ॥ सर्व्वत्र कुशलं ता
त द्रष्टुं कुशलमुत्सहे । त्वत्तः को न्योऽस्ति कुशली पृथिव्यां सर्व्वराजसु ॥ त्वयैकः सन् जिगायाशु सवाल्मकलपार्थिवान्
॥ कुशलं वर्द्धतां नित्यं तव राजर्षिसत्तम ॥ यथा नित्यां सदा वारैः पृथिवीं त्वाधि भूपते । तव वंशो जगद्व्य द्विक्षु वेशान्त
नः कुरु ॥ सुवंशं शुद्धसन्तानं सागरस्येव वर्द्धनं ॥ प्रथमं स्वगुणो राज्ञा क्रियतां नृपयोजनं ॥ ततः सज्ञाय महिषी क्रि
यतां स्वगुणोर्युतां । नित्यासंयोजिता येन स्या दुनिनाम् त्वयमेव हि ॥ स्वगुणेषु प्रवेक्ष्यन्ति महान्तो पि धृतव्रताः ॥ श्रूयते
हिमवत्पुत्री शम्भुं शगतमानसा ॥ क्रियाम्भुपायैर्बहुभिः शम्भुनाम्ना प्रयोजिता । ततो हिमवता प्रेम्णा शंकरस्या
पार्व्वती । शरीरमर्द्धमेनव तस्यैवानुमते सती ॥ अर्द्धनारीश्वरस्तेन तदाप्रभृति शंकरः ॥ अनयत्नृपश्या
द्धूल नान्यां सार्थां गृहीनवान् ॥ तस्मात्त्वमपि राजेन्द्र सजायामात्मनोत्तरं । गुणैः संयोज्य संयुक्तं संयोजयत ततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुतं॥ ॥मार्कण्डेयउवाच॥ इत्योर्व्वेणाषितं श्रुत्वा सगरोतिमुदायुतः॥ इदंमुनिमपृछत्स नृपतिः स्मितसन्नतः॥ सगर
उवाच॥ ॥कथं सा गिरिजादेवी कार्यार्द्धमहरत्सती॥ शंकरस्यमुनिश्रेष्ठ तदहं श्रोतुमुत्सहे॥ नित्याकृत्याचा
रोनृत्या आत्मानार्यासुतोथवा। तानीतिंश्च सदाचार सहितां श्रोतुमुत्सहे॥ राजनीतिः शतां नीति रन्येषाञ्चकु
तात्मना। पृथक् पृथक् श्रोतुमिछ्छे त्वहं त्वां प्रार्थये द्विज। यदिगुह्यमिदं ब्रह्मन् तदा श्रोतुमुत्सहे॥ तथा नाज्ञापयया
मि त्वां श्रोतुमिछ्छुस्तत्क्षमं। कृपयाकथनीयंतु तदाकथयतन्मुने॥ ॥मार्कण्डेयउवाच॥ ॥इत्येवं सगरेणोक्तः
और्व्वोपिद्विजसत्तमः। इत्युवाच महात्मानं श्रद्धालुस्तत्रभूपतौ॥ ॥और्व्वउवाच॥ ॥शृणु राजन्प्रवक्ष्यामि य
न्मुष्टोहमिह त्वया। यथाहरस्य तन्वर्द्धं भूभृत्पुत्री पुराहरत॥ यथानीतिश्च याकार्या यत्रयत्र नृपोत्तम॥ सर्व्वेषां वः
सदाचारं क्रमाद्वक्ष्यामि तच्छृणु। यदोढा हिमवत्पुत्री शंकरेण महात्मना॥ कियन्तं स तदा कालं तत्र नित्यं सहोमया
रममाणस्तयासार्द्धं सानोः कुञ्जोदरीषुच॥ विजहार चिरं तत्र पार्व्वती मोहयन्हरः॥ अथकाले तु संप्राप्ते शम्भुः कै
लासपर्व्वतं॥ सगणो नायसार्द्धं सोगछ्छत्रिदिवोपमं। सततं चिन्त्यमानश्च त्यक्तध्यानात्मचिन्तनः॥ तदुक्तेचक्षणेतत्राः
णि वकोराणीवचाकरोतं। पुष्पाणीक्ष विदाहश्च गिरिजांप्रति शंकरः॥ सर्व्वाङ्गसंगिनीयान्तु विदधेतिमनोहरां। क

या२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दाविदादर्शतले युगपच्चात्मनो मुखं ॥ सुखं तथैव पर्य्याया वीक्ष्यास्त्रक् एष ध्वजः । कदाचिन्मृगनाभिनां विलेपैर्गन्ध
पात्रकं ॥ तस्या घनस्तनयुगे विलिलेख स्मरान्तकः । गन्धसार विलेपेन तिलकान्यपि कानने ॥ ललाटे चाकरोच्चारु चन्द्र
वक्त्रा सुसुन्दरी । द्रुम निर्यास संसक्तः केशपाशेषु चित्रकं ॥ चन्दनागुरुकस्तुरी कुंकुमैः सविलेपनैः । चकार तेन तस्यास्तु
केशपाशा व्यजायत ॥ नर्त्तनाया विकीर्णस्य शिखिपिच्छस्य साम्यकं । जाम्बुनदमयान्मुद्रान् कुण्डलस्यां मनोहरां । अल
कारानुमादेह समकार्षीद् वृषध्वजः ॥ तैर्जाम्बुनदसंभूतैर्योजिते गिरिजा तनुः ॥ विभातिजलदारूढ़ कालिकेव तड़ि
द्गुणैः ॥ सर्वदैतैरलंकारैर्नानारत्नैः सदंसुकैः । संपूर्णमण्डिता काली साहस्यं प्रकृतेर्दधौ ॥ एवं स दानुरक्तस्सः तस्या
शम्भुर्जगत्पतिः । जगद्धिताय चिक्रिडे काल्यादयितया सह ॥ काली च जगतां माता महामाया जगन्मयी ॥ योगनिद्रा जगद्धर्त्री
विद्याः विद्यात्मिकाखिला ॥ प्रकृतिः परमा मूर्त्तिर्निर्गुणादान्तकारिणी । संमोह्य शंकरं यत्ना जगतां च हितैषिणी ॥ रेमे तेन
समं देवी चन्द्रिकेव सुधांशुना । अथ कदाचिद् हरः कैलासाग्रे सहोमया ॥ रममानो मुदा युक्तो ददृशे प्सरसः शुभाः । रूप
यौवन संपन्नाः सर्व्वलक्षणसंयुताः ॥ तासां मध्ये गता वेश्या उर्वशी च मनोरमा । ताः सर्वा रक्तगौरांग्यः सर्वालंकारभूषिता । राम:
मुनीनां च मनो त्यर्थं शक्ता मोहयितुं तदा ॥ ताः प्रणम्य हरं हृष्टा गिरिजां च मनोरमां । अथ प्राञ्जलयस्तस्थु स्तन्नीति नत ११७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मस्तकाः॥ अथ प्राह तदा नर्गः पार्वतीमिदमञ्जुनं। तासां समक्षं तस्यास्तु नाक्षितं स्वाद्यदर्शीयं॥ कालीति भिन्नांजनश्यामे उ
र्वश्याद्यप्सरोगणाः। त्वयाहं त्वोपुनावेषु संलापः क्रियतामिति॥ तच्छ्रुत्वा वचनं तस्य यथायोग्यं च सोर्वशी। अप्सरसः समा
नाय्य विसृष्ट गिरिजानया॥ अथ सा क्रोधवशगा पार्वती शंभुनार्पित। कालीति भिन्नांजनश्यामे हृदि ताः सवनं क्षणात्
॥ साप्सरसा च पुरतो वर्षीदेशविकत्थनं। न येहं मन्मनायुक्ता गिरिजेन्दुकलान्वितः॥ अथ सा रोषसंयुक्ता त्यक्त्वा हषन
केतनं। अपक्रान्ते शैलसानौ रोषात्प्रकृतिमागते॥ मार्गमाणोथ विरहव्याकुलो वृषभध्वजः। नाससाद कियत्कालं पार्वती
पर्वतोत्तमे॥ विरहव्याकुलं ज्ञात्वा स्वयं सा पार्वती हरं॥ आत्मानं दर्शयामास गिरिशानावपक्तु तानाभासाद्य तदा शंभुः
किमर्थमत्र जल्पिये॥ मानं मुदं मनोदेहि विनाशाद्भवाब्रवीत्। नानुरागपुरंध्रीणां मानग्रहणकारणं। तद्विनाग्रहणात्त
स्य नीरुः प्राप्नोति वाच्यतां। तस्मात्किमर्थमकरोः रोषं तज्जल जाननेन॥ तदा वहसुतं कान्ते मनो मे न प्रसीदति। इत्युक्तोः
शंकरो देवीं तामालिङ्ग्य तु मुख्यतः॥ कालीत्वं कारयामास वचनं चाब्रवीदिदं। नदृष्टपूर्वा किमहं येन भिन्नाञ्जनोपमा॥ कि
यते मयि नूतेश्च नवनाप्सरसां पुरः। जातिहीनं वित्तहीनं रूपहीनमदक्षिणं॥ हीनांगमतिरिक्तांगं तेन दोषेन नाक्षिपे
त्। इति ब्रह्मसुरापाह वेदो यार्थविनिश्चितं॥ तस्मात्वमत्यजत्वता परीहासोद्य नाप्यते। यावन्नमे शरीरस्य न विश्रीवर्ण

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गौरता ॥ न समेष्येत्वयानाव दितिसत्यं ब्रवीमि ते। शरीरगौरतां शम्भो त्वत्समेष्ये विना त्वया ॥ तत्रमेस्मृत्य यामासा मात्मानः
सत्यमासये। इत्युक्त्वा सा तदा देवी तस्य वपुरतो ययौ ॥ महाकोशीप्रपाताख्यं हिमवत्सानुसुत्तमं। महादेवोपि तं नाप्यं ज्ञाने
न कृत निश्चयं ॥ अथ ज्ञात्वा तदा पर्शो सर्वज्ञो नाप्यवारयत् ॥ सा गत्वा पूर्ववत्तत्र शंभुसंगतमानसा। शंभुमाराधयामास व
र्षाणि हृषवध्वजं ॥ एकं पादं समुत्क्षिप्य वामेनांगुष्ठवै क्षितिं। उत्तराभिमुखी भूत्वा निराहारा निरन्तरं ॥ वैयाघ्रचर्मवस
ना सोर्द्धमूर्द्धनि नासती ॥ ज्योतिर्म्मयं परं शान्तं शिवं शिवकरं परं ॥ आत्मास्वरूपतत्त्वज्ञा तत्त्वेनाराधयद्धरं। तां चिन्तयन्ती
परमं निश्चलां तत्त्वमानसी ॥ मेने सुनिगणास्थाणु यो न जानाति तत्त्वतः। एवं तस्यास्तपस्यन्त्या जग्मुर्वर्षाणि वेशतं। अथैषा
स्वयथा देवमेकं नृपतिसत्तम। ततस्त्वागतवर्षान्ते शंकरो योगतत्परः ॥ आत्मानं दर्शयामास क्रमादेवसतद्धेरु। प्रथमं दर्शि
यामास ब्रह्माणं स हरिं ततः ॥ ततो तु श्रांतवं देहं ततस्तेषामथैकतां ॥ ज्योतिर्म्मयत्वं शुद्धत्वं सर्वेषां हेतुतां तथा ॥ ततः पुनः श्री
भूरूपं दर्शयामास शंकरः ॥ योगनिद्रां महामायां वैष्णवीं कालिकाम्बिकां। प्रथमं दर्शयित्वा तु तस्याः प्रकृतिरूपतां ॥ पश्चात्सा
पार्वतीत्येवं क्रमात्तस्यात्मदर्शनात् ॥ तपसा संस्तेनात्मु ज्ञानेनात्मा स्वपार्वती। अन्तर्दृष्ट्वा वहिर्दृष्ट्वा तत्त्वं ज्ञात्वा यथा तथा ॥ शं
भुं जगन्मयं मेने तथात्मानं जगन्मयीं ॥ ब्रह्मा विष्णुर्हरः शंभुः शंभुसर्वमिदं जगत्। अहं समस्तप्रकृति योगनिद्रान्तदायये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥इति ध्यानेन सा देवी प्राप्य ध्यानं तदात्मजा। उन्मील्य नयनद्वन्द्वं बहिः शंभुं ददर्श च॥ सा दृष्ट्वा शंकरं देवं देवदेवमुमा
पतिं। तुष्टाव वाग्भिरिष्टाभिर्यमिनं योगतत्परं॥ ॥श्रीपार्वत्युवाच॥ ॐ नमस्ते जगतां नाथ नमस्ते केशवाव्ययाप्रधा
नपुरुषातीत कारणत्रयकारण॥ योगमोहमनोराग धर्म्माधर्म्ममयस्तथा। विद्याविद्यास्वरूपश्च शंभवः कायरूपते
त्वं निःश्रेयसः श्रेयसां योज्यमानो दृश्यो दृष्टो योगमुक्तिर्मनीषी॥ सम्यक् श्रद्धापौरुषेनत्वरूपात् त्वं वै ज्योतिः शान्तिरूपप
रस्तात्॥ ब्रह्मा विष्णुस्त्वं हरस्त्वं महेन्द्रः सूर्यः सोमो वायुरग्निर्द्धनेशः॥ त्वं तोयेशः शमनो राक्षसश्शेषस्त्वन्तो निद्यन्ते को स्तं ५
पिनाकिन्॥ त्वं भूमिर्द्यौः खः सर्वश्चापि पन्थास्त्वं जंगमस्थावरो भूजलस्थः॥ ज्ञानगम्यं ध्यानगम्यं त्वमेकः परात्परं व्यक्त
रूपं परेषां त्वं पुरुषः परमात्मा प्रधानः त्वं हिज्यायान्योगसंज्ञानुबन्धः॥ भावः सत्यं पञ्चरूपी समस्तो रासाद्यन्तगोचरोः
यं स्वरार्थे॥ कीर्त्तिः कीर्त्यः सत्यरूपिस्तु विश्व द्रष्टा दृश्यः स्थैर्यधृक् तारकश्च नित्यानित्या युक्तयोग्या वियोगादीनादी
नेन भेद साम प्रयोगः॥ नीतिर्न्नयादीक्षितो दक्षिणाश्च सारोसारः सविधाता विधेयः॥ आयानश्चो रूपधृक् रूपहीनो दि
व्यो देवो मानुषो मानुषश्च॥ स्रज्यस्रष्टापालकः पाल रूपविनाचे योने मियुक्तस्तथो र्म्मिः॥ विद्वान् विद्यो वेदवादैकरूपोः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपारूपस्तीक्ष्णसौम्यैकरूपः।भावाभावःसोऽनन्तनामाशुद्धरूपीशम्भुःकान्तःशान्तिरूपीमुनीनां॥द्वंद्वाद्वंद्वःसर्वगोऽसर्व
गस्त्वभ्रान्तोभ्रामकःसिद्धासिद्धिप्रसिद्धः।एकस्थस्त्वंसर्वलोकप्रदेहो निर्गेहस्त्वंगेहयकःसुराणां॥स्थूलःसूक्ष्मोनि
र्विकारःशरीरीविश्वात्मात्वंनास्तिभिन्नोभवेश॥कार्याकार्येयस्यरूपेसमस्तेव्याप्याव्याप्येलोगहीनोतिमूर्त्तः॥यो
गज्ञानस्थानकालस्यनित्यंरूपंयस्यश्रीदतुभ्यंनमस्ते।प्रधानपुंसोरपियोविधातायःकालरूपीपुरुषःपरेशः
तमीशमुग्रंवरदंवरेण्यंनमामिविन्नीतिवीतानकल्पं॥अव्यक्तयोयोव्ययःसाक्षीक्षेत्रज्ञःक्षेत्रभृद्धरः।तस्मैनमस्ते
विश्वात्मन्वृषध्वजमहेश्वर॥ज्ञानामृतविनिस्पन्दि यस्यविश्वन्तुमाःसदा॥तद्रूपमकथ्यंज्ञेयंनक्षिमात्रान्नमो
स्तुते॥ ॥श्रीदेवउवाच॥इतिस्तुतोमहादेवसर्वभूतात्मकःपरः।प्रसन्नवदनःप्राहपार्वतीप्रतिहर्षयन्॥प्रीतोस्मिदे
विभद्रन्तेवरंवरययद्वाञ्छितं।तपसाव्याप्तितस्त्वाहंत्वयावश्यातथाहरिः॥तपसात्वत्समोनास्तिशीलेनचरितेनः
वा।त्वांविनानहितृप्यामिप्रियेकुरुयथेप्सितं॥ततःसामोहिताप्राहमाययाहिमवत्सुता।जांबुनदसमोगौरीमदेहो
भवतुसांप्रतं।अनन्यकान्तस्त्वंचापिभूयोमत्तोविनाहर॥एवमुक्तोमहादेवःपार्वत्यापार्वतींततः।आकाशगंगातो
योघेमज्जयामासभाविनी॥सानिमज्जसमुत्तीर्णाविधुनोरीनतनुंव्यधात्।सितांनीमध्यगादेवीसारदाभ्रेतडिद्यथा॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शंभुश्चाङ्गीचकारास्तु नाहं त्वत्तो विना प्रिये। मनसापि ग्रहीष्यामि नान्यां सत्यं ब्रवीमि ते॥ ॥मार्कण्डउवाच॥ अथ तेनैः
यात्समुत्तीर्ण पार्व्वती मोदसंयुता। तपः क्लेशापरित्यक्ता वह्निकेशरवद्विभोः॥ अथ तां पार्व्वतीं देवीमादाय वृषभध्वजः
जगाम स्वालयं कैलासं खमाक्रम्य पदं लघु। तत्र गत्वा हरो देवीमधिवास्य विभूष्य च॥ पूर्व्ववन्मोदयामास नर्म्महासकथा
दिभिः॥ सापि सौवर्ण्णगौराङ्गी वीक्ष्य रूपं मनोहरं॥ गृहीत्वा समयं शंभुं प्राप्यातीव मुमोद ह। एवं तयोस्तु शिवयो रन्योन्य
रममाणयोः॥ जगाम सुचिरं कालं कैलासे पर्व्वतोत्तमे। अथैकदा महादेवः समीपे हिमवत्सुता॥ आसीना ददृशे तस्याः
श्छायामुरसि स्थितां। स्फटिकाभ्रसमस्वच्छे हृदि शम्भोर्मनोहरे॥ योगिज्ञानादर्शतले चार्व्वङ्गीः प्रतिविम्बितां। आत्मनः
छायां गिरिसुता वामे नागे मनोहरे॥ ददर्श वनितारूपां स्मितवक्त्रां मनोहरां। भ्रान्त्या दृष्ट्वाथ पार्व्वत्या तदाज्ञानमजा
यत॥ कृतं तत्रापि गिरिशः किमन्यां वनितां दधौ। माययात्यापि नागात्रे वीक्ष्यन्ती कुटिलभ्रुमां॥ इति तस्यापि संक्रुध्य
मलिनं भ्रुकुटीमुखं। वक्त्रं वदि विकेतुश्च स्यामरुत्पातको यथा। सा च दृष्ट्वा तदाच्छायां विस्मया या विमोहिता। अयं
कृतो गिरेः कुञ्जमानाक्रोधाद्विवेश ह॥ अथ तां मार्ग्गमाणस्तु शङ्करो विरहाकुलः। विशदपङ्कतां देवीमाससाद त
नोहरः॥ तामासाद्य महादेवो विवर्ण्णवदनां प्रियां। उवाच रोषणो हेतुं ज्ञातुमिच्छुर्यथागतं॥ ॥ईश्वर उवाच॥

का०पु किमर्थं त्वं वरारोहे मह्यं कुप्यसि कोपने। रोहेषं तु महं वक्तुं न वेद्मि कामीह वल्लभे।। न तुल्यमपराध्यामि वाचा वा मन
११६ सा थवा। कायेन वा कथं कोपं कर्तुमर्हसि भाविनि।। ।।देव्युवाच।। समयेन मया पूर्वं तपसा प्रार्थितो भवान्। कथं
मां परित्यज्य तन्मन्यां भार्यां सि मिहसा। प्रतिक्षणं मया दृष्टा तव हृद्यन्तरे हर। चार्वङ्गी वनिता काचित्कोपनिर्याति म
स्मनि।। भवान्सर्वज्ञानमयः सर्वगः परमेश्वरः।। याचितो मे तपोवृत्तेर्न तुष्टः त्वं महेश्वर। तस्मादहं तपस्तप्तुं श्रा
श्वशृङ्गन्तु समुत्सहे। अनुजानीहि मां भो नाम विलम्बं वृथा वृथा।। इति तस्या वचः श्रुत्वा स्मितविस्फारिताननः। शङ्क
रः पार्वतीं प्राह सस्नेहमिह मानिनी।। ।।श्रीईश्वर उवाच।। नाहमन्यां स्त्रियं वीरा नाहं समयभेदकः। तव मि
थ्यामतिर्जाता मुग्धे मन्मूर्तितयाधुना।। आ तु यदि द्रक्ष्यसि सत्यं तव हेतु च पार्वती। तदहं कथयिष्यामि मानं मा निनि
मा हृथाः।। मम वक्षसि विस्तीर्णे दर्पणाभे स्वच्छताविनि। नैव च वपुश्छाया विम्बिता लोकिता त्वया।। इदानीमव बु
ध्यस्व त्वामृते नास्ति सा मयि। नात्र मानं त्वया कार्यं हृदयान्तरमाश्रिते।। ।।श्रीदेव्युवाच।। मयि स्थिता यां छाया
सि मा मृते नास्ति सा पुनः। कथमेतत्त्वया ज्ञेयं तन्मे वद महेश्वर।। ।।श्रीईश्वर उवाच।। ।।तवाक्ष्यन्तरे स्थित्वा तः रामः
स्थानेन मनोहरे। पश्यतो याधानियाति मूर्ति लेपसु तेमम।। तथा त्वं मम हृत् तदहं वीक्ष्य दर्पतलं पुनः। महदासन्नमा ११२

साघ तां स्वच्छायां विलोकय॥ यथा सा कुरुते देवी कापटनेत्रविभ्रमं। तथा सा कुरुते छाया करकम्पादिकं तदा॥ ततः
पुनर्गवाक्षस्य जाले स्थित्वा हिमात्मजा। तथा व्यलोकछैयंस्री हृदयं वीतभूतकं॥ तया तत्रनु पार्श्वस्था दृष्टमध्यजवक्षसि।
दृष्ट्वा दर्शितलेवक्रं निजदेहस्थ पार्वती॥ आलोकयामास तदा शाम्भुं करवक्षसि। यथाद्रक्षसि देहं त्वं तत्कुरुत्वं तथा मम
आलोकय निजां छायां त्वां विना नास्ति तत्पुरः। त्वामेवं ज्ञास्यसि छायां मद्वक्षसि मनोहरं॥ ज्ञात्वा विमुह्यमानां त्वां मा वाप्य
तु पयघ्नतां॥ ॥श्रीईउवाच॥ एवमुक्त्वा हरे नाथ पार्वतीं तु कलात्मतः। तोयेनिप्राय हृदयं स्वां छायां पुनरैक्षत। दृष्ट्वा
दर्शितलवक्त्रं निजदेहं च पार्वती॥ आलोकयामास तदा शाम्भुं करवक्षसि। यथा सा कुरुते देवी कापटनेत्रविभ्रमं॥ य
था सा कुरुते छाया करकंपादिकं तथा। न कापि दृष्टा वनिता दृष्टं जानाम्यमण्डलं॥ एवं बहुविधै देवी तदोपायैः तथे
तरैः। निर्जितसंज्ञायो भूत्वा लज्जां प्राप वरांगना॥ तां लज्जितां गिरिसुतां मिषज्ञीतामधोमुखीं। स्वां तु मालिंग्य पाणिभ्यां
मुखं तस्याश्चुचुम्ब च॥ तदा भीरुं महादेवो देवीमाश्वासयन्मुहुः। मा व्रीडस्व महाभागे भ्रान्तिः कस्य न विद्यते॥ मानस्त्वयि
वरस्त्रीभिः कार्यः प्रेमकरोपरं। त्वयापि विरलः कार्यो मानो देवीन सर्वदा॥ इत्युक्त्वा देवदेवेन मेनाकसहजां प्रियां का
न्तां करं प्रणायवाह सूनृतं मधुरस्वरं॥ ॥श्रीदेव्युवाच॥ यथा नवाहं सततं छायैवानुगता हर। तवैवयं साहचर्यं तथा

का॰पु
१२०

मांकर्त्तुमर्हसि॥ सासर्व्वगात्रसंस्पर्शं नित्यालिंगनविभ्रमं। अहमिच्छामि भवतः तत्त्वं चेत्कर्त्तुमर्हसि॥ ॥श्रीभगवानुवा
च॥ शिवतेनन्मस्यमपि यत्त्वमिच्छसि तांविनिा तत्रोपायमहंवक्ष्ये यदिशक्नोषि तत्कुरु॥ अर्द्धं सम्यक्गृहाण त्वं शरीरमे
मनोहरे। अहं त्वत्तनुमेनारी तथैवार्द्धं पुमानिति॥ यदि त्वं न हि शक्नोसि हर्त्तुं तत्त्वार्द्धमीदृशं। तदाहं नेहरिष्यामि शरीः
रार्द्धं वरानने॥ त्वैवार्द्धं तदा नारी त्वदर्द्धं भवतु पुरुषः। विद्यते तत्र शक्तिर्मे त्वमनुज्ञातुमर्हसि॥ ॥श्रीदेव्युवाच॥ तवैवा
र्द्धं हरिष्यामि शरीरस्य वृषध्वज। किं त्वहं त्वेकमिच्छामि तद्भूत्त्वं हरइच्छसी॥ तदाहमर्द्धं भवतो हत्वा तिष्ठामि वा तदा। त्यजा
म्यहं तदा तेर्द्धं संपूर्णस्या तदा च यत्॥ इत्युर्द्धं नागृहणं तवेष्टादियथेप्सितं। तवैवाहं यदा यांतो शरीरार्द्धं हराम्यहं॥ ॥
॥श्री ईश्वरउवाच॥ एवमस्तु भवेनित्यं यथाकर्त्तुं त्वमर्हसि। शरीरार्द्धं त्वद्गृहाणं भूयात्तव यथेप्सितं॥ ॥श्रौर्वउवाच॥
अथ गौरी तदा पूर्व्वमनुभूत तपः स्थिता। योगनिद्रास्वरूपन्तु स्वात्मयोगेन चिन्तयेत्॥ हरं प्रणम्य प्रथमं ब्रह्माणञ्च ततस्त
परं। ततस्त्रिजगतामीशं हरिं नारायणं प्रभुं॥ चिन्तयित्वा तदा तेषामेव तां सा जगन्मयी। आत्मानं योगनिद्रां च चिन्तयि
त्वा तपस्विनी॥ दक्षिणां च शरीरस्य भागार्द्धं शंभोराहृत॥ शरीरस्य तथा वाममति प्रेम्णा निजां हरे॥ हरोपि स्वशरीरार्द्ध रामः
गौरीकायेतथा स्वयं। प्रेम्णा यवेशायत्तस्य चिकीर्षुः प्रियमद्भुतं॥ अथ स्थित्वा तदा भर्गः कान्त्या सह चिरं तदा। परित्यज्य १२०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शरीरार्द्धं पृथगेव वनोरुहा॥ कालीन्तु वामसंस्थानीं शरीरार्द्धे स्थिताङ्करं। प्राप्य मोदान्तदात्मानं संस्तुष्टा व जगन्मयी। एवं
यदा शरीरार्द्धमादाय परमेश्वरी॥ स्थितिस्तिष्ठति तदा राजते नीव शोभना॥ अर्द्धं धम्मिल्लसंयुक्तं जटाजूटार्द्धयोजितं।
ए[illegible]कस्मिन् श्रवणे भोगी नागेन्द्रास्तु नन्दोचितं कुण्डलं श्रवणे न्यस्मिन् शीर्षे तस्या व्यजायत। अर्द्धं मृगाक्षिवान्यार्द्धं वृषभा
क्षितघापरं॥ अर्द्धं स्थूलंनसं चारु तिलपुष्पनसं परं। दीर्घमश्रुतथैवार्द्धमर्द्धं मश्रुविवर्जितं॥ सुरक्तचारुदशनं रक्तौष
मेकं तत्र तथा। अपरं शुक्लं विपुलं दीर्घकेतिनदं परं। अर्द्धं नीलगतं चारु मपरं हारमण्डितं॥ अर्द्धं कङ्कणकेयूरयुक्तवाहु
न्तथापरं॥ नागकेयूरसंयुक्तं स्थूलवाहु निरूर्मिकं। अर्द्धं विसायतभुजं करिहस्तभुजं परं॥ एकत्र सोर्म्मिका शाखाः कर
सान्यत्रतान्विका। एकं स्थूलन्तु हृदयं रोमावल्यर्द्धसंयुतं॥ रं नास्तनसमानोरु सुपार्श्वं मृदु चादिकं। एकं परं तथा स्थूल
जघनं सुमनोहरं॥ तथापरं हरकटि संघातोर्द्ध पदाम्बुजं॥ एकं वैयाघ्रचर्म्माग्रियुक्तं भूतिविलेपितं। अपरं मृदुकौशेय
वसनं चन्दनोक्षितं। एवमर्द्धं तथा जातं योषिल्लक्षणसंयुतं॥ अपरं वलवद्भूरि सगूढपुरुषाकृतिः॥ एवमर्द्धं स्मरारिर्यो
जह्रासगिरिजासती॥ हितायसर्वजगतां कालिकाकालिकोपमा। तस्यां [illegible]शरीरं राजेन्द्र हरतत्त्वार्द्धसंयुतं॥ येनोपमेयं त
न्नास्ति मार्गितं भुवनत्रये॥ सन्तानः पारिजातो वा एकान्तवि[illegible]मतरुः॥ अमोघ या यथा वाल्या तेचापि यतुन्नहि। वस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का०पु
१२१

धावपृथक्त्वेन तौ रेमाते नरेश्वराः ॥ अर्द्धनारीश्वरो भूत्वा स तु रेमे कदाचन ॥ इति यद्यपि भूतेशः स्वयं शक्तो ति कालिकां ॥
गौरीकर्तुं तदा सर्व्वं भूतकारणकारणः ॥ तथापि तां गिरिसुतां संयोज्य विविधैः पुरा ॥ तपस्संयोजयद्देवः क्रियोपायैरने
कशः ॥ तपोभिः पूतिसर्व्वाङ्गी पश्चाद्गौरीमथाकरोत् ॥ अर्द्धश्च प्रददौ तस्यै शरीरस्य महेश्वरः ॥ नैवास्य तत्त्वं जानन्ति ब्रह्माद्याः
सकलाः सुराः ॥ गौरीशरीरार्द्धप्रदानस्य तपसि योजनस्य च ॥ एतस्य तत्त्वं जानन्ति महात्मानो महाबलाः ॥ नन्दिभृङ्गिमहात्मानौः
वैतालो भैरवस्तथा ॥ अङ्गभूता महेशस्य वीतभीताः तपोधनाः ॥ ये मानुषशरीरेण प्रापिरे तपसो बलात् ॥ गणानामाधिपत्यं तु
ते जानन्ति परं हरं ॥ एवं सदा त्वया योज्याः सानुगा नृपसत्तम ॥ वनितास क्रियोपायै ता नो नडमवाप्स्यसि ॥ य इदं शृणुयान्नित्य
मद्भुतं पुण्यदायकं ॥ शिवयोः प्रीतिकरणं शरीरार्द्धग्रहं तथा ॥ गौरीत्वासादनञ्चैव कालिकाया तथाद्भुतं ॥ न तस्य विघ्ना जायन्ते
सर्व्वपुण्यतमो मतः ॥ दीर्घायुः स सुखी भूयात् तु अपो अ समन्वितः ॥ स ततं परिगृह्णानः शिवयोश्चरितं महत् ॥ शिवलोकमवा
प्नोति सुचिरं शिववल्लभः ॥ ॥ इति श्रीकालिकापुराणे अर्द्धनारीश्वरोपाख्यानं पञ्चचत्वारिंशोध्यायः ॥ ४५ ॥ ॥
सगर उवाच ॥ कोसौ भैरवनामाभूत् को वा वेतालसंज्ञकः ॥ कथं वा तौ शरीरेण मानुषेण गणाधिपौ ॥ अभूतां द्विजशार्दूल
तन्मे वद महामुने ॥ जानाति नन्दिनौ विश्वं सहायं च वृभूभूतः ॥ यथा नवं क्षणाध्यक्ष तन्नारद सुखाद्भुतं ॥ तं यथा भृङ्गिमहा

राम:
१२१

कालौ विख्यातौ भिरुरात्मजौ ॥ कथन्त्वेतौ समुत्पन्नौ त्वत्तस्तौ तुं समुत्सहे ॥ योसौ शरभरूपस्य महादेवस्य वै पुरा । कायभागः
स्तुतः पूर्वं समभूद्भैरवाह्वयः । स एव किं भैरवाख्यः किम्वान्यो द्विजसत्तम ॥ वेतालश्चैव तन्मे त्वं सर्वमिच्छामि वे मुने । एक
स्य तनयौ भूत्वा गणौ यस्त्वमागतौ ॥ तच्चापि कथयस्वाद्य यथा वा वानराननौ ॥ ॥मार्कण्डेय उवाच॥ शृणु राजन् प्रवक्ष्यामि
महाकालस्य भृङ्गिणः । भैरवस्यापि चरितं वेतालस्य महात्मनः ॥ योसौ नन्दी हरसुतो महाकालोपि तद्गजः । तावेव गौरीशापे
न संभूतौ नरयोनितः ॥ वेतालभैरवौ जातौ पृथिव्यां नृपवेश्मनि । यथा तु भृङ्गिमहाकालावुत्पन्नौ प्राक् तथा शृणु ॥ योसौ महा
भैरवाख्यः स कायः शरभो हरः ॥ भैरवः एष गेवायं गणाध्यक्षो हरात्मजः ॥ उमायां हिमवत्पुत्र्यां भर्गेण सुमहात्मना ॥ नारे
स्म प्रोत्सादोमृतवर्षणं ॥ आप्लावनञ्च कर्त्तव्यं चिन्तामात्रं विशुद्धये ॥ अशुच्या चिन्तनाद्देहा तन्मयो देवचि
न्तनात् ॥ स्वकीयस्येष्टदेवस्य चिन्तासर्वात्मनो भवे ॥ सोऽहमित्यस्य सततं चिन्तनाद्देवरूपता ॥ आत्मनोजा
यस्य ध्यानजगद्व्याप्तं सचराचरमानुषाः ॥ २

॥राम॥
॥१६२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यतेसम्यक् संस्कृतिः पुष्पदानतः । अर्हदेवार्घनैवेद्यं पुष्पगन्धादिकं चयेत् ॥ पूजोपकरणस्यापि देवत्व
मिह जायते ॥ देवावासस्य गृहदेशो देवं देवाय योजयेत् ॥ सर्वेषां देवतास्तस्था जायन्ते शुद्धतो प्रिवामनो वी
जात्मनः शुद्धिः प्राणायामेन जायते ॥ अन्तर्गतं यश्च मलं तच्छुद्धं प्रजायते । गृहे चैव तु जपेद्देवं तदात
स्यविलोकनं ॥ कुर्यादादित्यबीजेन चतुःपार्श्वेषु अनुक्रमात् । हान्तः समाप्तिसहितो वह्निबीजेन संहितः
॥ उपान्तेः सचतुर्थस्तु स तथा सर्वलोऽप्यतः । आदित्यं जं कथितं सर्व रोगविनाशनं ॥ धर्मार्थकाममोक्षाणां
कारणं तोषदायनं । अशुद्धिपक्षिसंयोगे पक्षिविष्टाप्रसेवनं ॥ मूषिकालाङ्गुलस्पर्शः कृमिकीटादिसंग
मं । एवमादि विनश्यन्ति लोकानां गृहदूषणं ॥ ततस्तु योगपीठस्य ध्यानं प्रथममाचरेत् । ध्यानमात्रं योगः
पीठं प्रविशत्येव मण्डलं ॥ योगपीठस्य तेसर्वं योगपीठमयं समं ॥ न योगपीठादधिकं विद्यते परमासनं
॥ यस्य ध्याने जगत्प्राप्तं सचराचरमानुषं ॥ एवं चिन्तनमाहात्म्यं को वा वक्तुं समुत्सहे । चिन्तामात्रेण मनसा
यस्य शोकाव नाशनं ॥ धारणा योगपीठस्य चतुर्वर्गफलप्रदं ॥ शुद्धस्फटिकसंकाशं चतुष्कोणं चतुर्वृतिं ॥
आधारशक्त्या विहितं गहणं सूर्यसन्निभं । आग्नेयादिषु कोणेषु चतुर्भुजक्रमतः स्थितः ॥ धर्मज्ञानं तथैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अर्थ्यं वैराग्यं क्रमतः सदा। पूर्व्वादिदिक्षु चैतानि स्थितानि क्रमतो यथा॥ अधर्म्मञ्च तथाज्ञानमनैश्वर्यन्ततः
परं। अवैराग्यं ततः पश्चाज्ज्वारणात्सव्यवस्थितं॥ तस्योपरि जलो यस्य तस्मिन्ब्रह्माण्डमास्थितं॥ ब्रह्माण्डजलञ्चै
रेतोयं कूर्म्मस्तस्योपरि स्थितः॥ कूर्म्मोपरि तथानन्तः पृथ्वी तस्योपरि स्थिता॥ अनन्तनागाद्यसहितं नालं पाताल
गोचरं॥ पृथ्वीमध्ये स्थितं पद्मं दिक्पालैर्गिरिकेतनं। तस्यारदिक्षु दिक्पालाः स्वर्गमध्ये व्यवस्थिताः॥ कर्णिका
या ब्रह्मलोका महर्लोकादयोप्यधः। हरत्याज्योतिषिवादित्याः चतुर्वेदास्तदन्तरे॥ सत्वं रजस्तम इति गुणाप्र
कृतिसंभवाः। सदा स्थिताः पद्ममध्ये परं तत्त्वं तथैव च॥ आत्मतत्वं तत्र संस्थं मूर्द्धच्छेदनमूर्द्धतः॥ अष्टौ चतु
दलं तस्य केशराग्रे स्थितं पुनः॥ वाय्वग्निचन्द्रमरुतां मण्डलानि क्रमोत्तमः। सारासनं योगपीठं सुखासन
मतः परं॥ आराध्यासनमस्माच्च ततश्च विमलासनं। तथा विचिन्तयेत्सर्वं जगच्चैव चराचरं॥ ब्रह्म विष्णुशिवाः
याश्चैव नागत्रयविनिर्म्मिताः॥ आत्मानं चिन्तयेत्तत्र पूजनं समुपस्थितं। मण्डलं योगपीठन्तु पद्मं पद्मन्तु चि ॥रामः॥
न्तयेत्। सारादीन्यासनानीह चत्वार्यपि विचिन्तयेत्। योगपीठे पूजयित्वा मण्डलेन सहैकतां॥ पुनर्ध्यात्वा ॥१६३॥
ततः पश्चात्पूजयेदासनं ततः। ध्यानेन योगपीठस्य यथा वद्दीयते जलं॥ नैवेद्यं पुष्पधूपादि ततस्त्वयं तस्य

दीयते॥ सर्व्वेदेवाः सगन्धर्व्वाः सचराचरगुह्यकाः॥ विघ्निताः पूजितास्तस्य योगपीठस्य पूजने। अनीष्टदे
वतापूजा विनायस्य विचिन्तयेत्। लभते वै चतुर्व्वर्गं तुष्टिः पुष्टिश्च जायते। आवाहनानन्तरतः पाणि
न्यामवतारयेत्॥ प्रागुत्तानौ करौ कृत्वा ऊर्द्ध्वमुत्क्षिप्य सान्तरौ। निरन्तरावधः कृत्वा नामयन् पूजकस्त
था॥ हिरण्याख्येन वीजेन तस्मादवतरेन्निच॥ आशोडितेन चानीष्टदेवानां लम्बनाय वै। नासिकावायुनिः
सारा द्विचत्वा देवतां नवेत्। एवं कृते महाउपेतु स्थितिस्तस्य प्रजायते॥ खान्तः सुधांशुः विन्द्वाढ्यं हरि
न्मवीजमुच्यते॥ नाशनं विघ्नवीजानां धर्म्मकामार्थसाधनं। गन्धपुष्पे तथा धूपदीपौ नैवेद्यमेव च॥ इ
यदन्यद्दीयते वस्त्रं अलंकारादिकं चयत्। तेषां देवतमुद्राञ्च कृत्वा प्रोक्षणापूजने॥ उक्तं जप्यमूलमन्त्रेण
पुनिनाम्ना निवेदयेत्॥ वरुणस्य तु वीजेन तेषां प्रोक्षणमाचरेत्॥ इष्टेन मूलमन्त्रेण ततो सर्ग्गनिवेदनं
। नपरश्चन्द्रविन्दुभ्यां वीजं वारुणमुच्यते॥ विलोकनं पूजनञ्च उपादानं पृथक् पृथक्॥ जपकर्म्मणि मा
लायाः प्रतिपत्तिरितीरितं॥ इष्टमन्त्रेण मालायाः प्रोक्षणं परिकीर्त्तितं। वीजं गणपतं पूर्व्वमुच्चार्य यद
नन्तरं। अविघ्नं कुरु मालेयं रक्षीयादि तानेन च॥ जपान्ते शिरसि न्यासो मालायाः परिकीर्त्तितः॥ अज

मादाय याणिभ्यां श्रीवीजेन तथाचरेत । अन्त्यदन्त्यान्त्यमात्राद्यां वादिवर्गविनुर्यके ॥ परतः परतः पूर्व्वं
श्रीवीजं विन्दुनेन्दुना ॥ मालायाञ्च वतारस्तु शिरसः क्रियते यदा ॥ तां समादाय पाणिभ्यां कुर्यात्सारस्वतं
नवै ॥ श्रीवीजाद्याद्यमाद्य विन्दुचन्द्रार्द्धसंयुतं ॥ एतच्चतुष्टयं वीजं सारस्वतमुदाहृतं ॥ पौराणिकैर्वै
दिकैश्च मूलमन्त्रेण चैव हि । प्रदक्षिणां प्रणामञ्च कुर्य्यात्सर्वार्थसाधकं । भूमीवीजं तथा भूश्च क्षितिवी
जेन पूर्व्वतः ॥ स्पृष्ट्वा तां शिरसा भूमिं प्रणामादिष्टदेवताः ॥ समाप्तिश्चैव वाराहः वीजं विन्दुसमन्वितं ॥ श्रि
तिवीजं विजानीयाच्चतुर्व्वर्गप्रदायकं ॥ दर्पणं व्यजनं घण्टा चामरं प्रोक्षयेत्तु नः ॥ नैवेद्यानोकमन्त्रेण
पूर्वोक्तेन तु भैरव ॥ नामाक्षराणि चाद्यान्ते चैतेषां विन्दुनेन्दुना ॥ तस्मै नमः इति प्रान्ते ग्रहणे मन्त्रमुच्य
ते । निवेदनेन चैतेषां मिष्टमन्त्रेण वाचरेत । वाग्भवस्य द्वितीयेन कामराजेन भैरव ॥ मुद्रायां बंधनं कार्य
मूलमन्त्रेण दर्शनं ॥ परित्यागस्तु मुद्राया तारवीजेन चाचरेत ॥ प्राग्वादिश्चन्द्रविन्दुभ्यां षष्ठस्वरसमन्वितः
तारवीजमिति प्रोक्तं धर्म्मकामार्थसाधनं ॥ मोदं ददाति यस्मात्सा मुद्रा तेन प्रकीर्त्तिता ॥ दर्शिता यान्तु
मुद्रायां तावत्पूजासमापनं ॥ कामं मोक्षं तथा धर्म्ममर्थं मोदयुतास्त्रयं । ददाति साधकायास्तु देवतागतं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुस्तुका॥ भुजान्तेतु महद्धामुजान् मतीसान् समुदीरयेत्॥ यद्दत्तं भक्तिमन्त्रेण पत्रं पुष्पं फलं जलं॥ निवेदितञ्च
नैवेद्यं तन्गृहाणानुकम्पया॥ आवाहनं न जानामि न जानामि विसर्ज्जनं। पूजाभागं न जानामि त्वं गतिः परमेश्व
री॥ कर्म्मणा मनसा वाचा त्वत्तो नान्या गतिर्म्मम॥ अन्तश्चरेण भूतानां द्रष्टा त्वं परमेश्वरि॥ नाथ योनिसहस्रेषु
येषु येषु व्रजाम्यहं। तेषु तेषु च्युता भक्तिरच्युतास्तु सदा त्वयि॥ देवो दाता च भोक्ता च देवः सर्व्वमिदं जगत्। देवो
जयति सर्व्वत्र यो देवः सोहमेव च॥ यदक्षरं परिभ्रष्टं मात्राहीनं च यद्भवेत्। क्षन्तुमर्हसि मे देवि कस्य न स्खलि
तं मनः॥ मन्त्रेषु पठिते देवे स्वयमेव प्रसीदति। दातुर्द्देवस्य तुर्व्वर्ज्जनच्चिरादेव भैरव॥ ईशान्यां मण्डलं कुर्य्याः
द्वारपद्मविसर्ज्जितं। विसर्ज्जनाच्च निर्म्माल्यधारणं पूजनाय वै॥ पाद्यादिभिः पूजयित्वा ध्यात्वा निर्म्माल्यधारणं
।निःक्षिप्य तस्मिन्निर्म्माल्यं मन्त्रेणानु विसर्ज्जयेत्। गच्छ गच्छ परस्थानं स्वस्थानं परमेश्वरि। यत्र ब्रह्मादयो देवा
न विदन्ति परंपरं॥ विसृज्य मन्त्रेणानेन ततः पूरक वायुना। ध्यायस्तु मन्त्रेणानेन नत्वा तां स्थापयेद्धृदि॥ तिष्ठ देवि
परस्थाने स्वस्थाने परमेश्वरी। यत्र ब्रह्मादयः सर्व्वे सुरा तिष्ठन्ति मे हृदि॥ नत्रयकजटाबीजै रिष्टदेवाश्रियास्मरन्
।निर्म्माल्यं मूर्द्ध्नि गृह्णीयाद्धर्म्मकामार्थसाधनं॥ मण्डलेप्रतिपत्तिस्तु ततः कुर्य्याद्विभूतये॥ सर्व्वाङ्गुली नाम मन्त्रो यैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पद्ममष्टदलान्वितं। निर्म्मञ्चेन क्षितिवीजेन मण्डलेवापि नैरव॥ ततस्तु मूलमन्त्रेण सर्व्वमात्मन वापुनः। अना
मिका नामयेन ललाटमपि संस्मरेत॥ समाप्त्यसहितः पुनस्ताराविजं ततः परं॥ वसुवीजं विसर्गेण परतश्च
रतः पुनः। नवैदेकजयावीजं धर्म्मकामार्थसाधनं। ततो भास्करवीजेन सहितेनात्मनः पुनः। मन्त्रेण भास्करा
यार्घमच्छिद्रार्थन्निवेदयेत॥ नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे। जगत्पवित्रे शुचये सवित्रे कर्म्मदायि
ने॥ ततः कृताञ्जलिर्भूत्वा पठित्वा मन्त्रमुत्तमं॥ एकाग्रमनसा वाग्मि रच्छिद्रमवधारयेत्। यच्छिद्रं तपच्छिद्रं
यच्छिद्रं पूजने मम। सर्व्वं तदच्छिद्रमस्तु भास्करस्य प्रसादतः॥ ततस्तु पुष्पनैवेद्यतोयपत्राधिकं चयेत्॥ देवीः
वीजेन तत्सर्व्वं पुनरेव विलोकयेत्॥ कृतेन चक्षुषा वापि यत्र यत्र कृतं पुरा॥ मन्त्रन्यासस्तस्य तस्य विसर्जि
रमुना नवेत॥ प्रान्तादिपञ्चमोवह्निवीजसन्धिस्वरान्वितः॥ तथोपान्ता वाम वायुं दुर्गा वीजं प्रचक्ष्यते। स्थण्डि
ले ज्वलदग्नौ तु तोयसूर्यमरीचिषु॥ प्रतिमासु वस्त्रवास्तु शालग्रामशिलासु च॥ शिवलिङ्गे शिलायान्तु पूजाकाः
र्य्या विभूतये। सर्व्वत्र मण्डलं न्यासं कुर्यादेकाग्रमानसः। योगपीठस्य वीजेन स्थण्डिलादिषु साधकः। वासुदेवस्य
रूपस्य ब्रह्मणो मिहिरस्य च॥ कुर्य्यात्सर्व्वत्र पूजास्तास्त्रप्रतिपत्तिमिमां बुधः। एवं यः पूजयेद्विष्णु मनोभिः प्रतिपत्ति

त्तिः॥ चतुर्वर्गप्रदस्तस्य न विराद्धीयते हरिः। शिवो वा मिहिरो वापि ये च लम्बोदरादयः॥ प्रसीदन्ति सुराः
सर्व्वे पूजायां विधिनामुना। विशेषेणो महादेवी महामाया जगन्मयी॥ प्रतिपत्तिमिमां नित्यं स्पृहयन्त्येव पूजने
॥ एवं यः कुरुते पूजां स सम्यक् फलमाप्नुयात्। एतैर्विहीना या पूजा ततोऽन्योन्यफलं भवेत्। अङ्गहीनस्तु पु
रुषो न समग्रप्राप्तिको यथा। अङ्गहीना यथा पूजा न सम्यक् फलमाप्नुयात्। इदं रहस्यं परम मिदं स्वस्त्ययनं
परं॥ मन्त्रं वेदमयं शुद्धं सर्व्वपापप्रणाशनं॥ यः श्रावयेद् ब्राह्मणः सन्निधाने श्राद्धेषु यज्ञे सुरपूजने षु। सम्य
क् फलं तस्य लभेत् सकर्म्मणां॥ विनापि पूजां तदनन्तमश्नुते॥ ॥ इति श्रीकालिकापुराणोत्तरतन्त्रे
षट्पञ्चाशोध्यायः॥ ५६ ॥ ॥ श्रीभगवानुवाच॥ देव्यास्तन्त्रं विशेषेण शृणु तं सा प्रणतं सुवा। येन वा
राधिता देवी न विराद्धरदा भवेत्॥ पूर्व्वतन्त्राद्विशेषेण तथा वै तन्त्रमुत्तमं। विशेषैर्नैव सामान्यान्वथि
तं भवतो यथा। पुनर्द्देवविशेषाणि पूजायां जपकर्म्माणि। यानि तन्त्राणि शेषाणि तानि वक्ष्याम्यशेषतः। य
पूज्यते महामाया लक्ष्मीमेकाग्रमानसः। स्वग्निर्णा वाऽङ्गमन्त्रेण तेन कार्यमिदं परं॥ फलं पुष्पं च ताम्बूल
मन्नपानादिकं च यत्। अदत्वा तु महादेव्यै नैवेद्यं कदाचन॥ पथि वा पर्व्वताग्रे वा समायामपि सा

वकः॥ तथा तथा निवेद्यैश्च स्वमर्थमुपकल्पयेत्॥ दृष्ट्वैव मदिरां नारीं रक्तवर्णास्तथा स्त्रियः॥ सिंहं शवं रक्तपद्मं
व्याघ्रं वा रुग्णसंगमं॥ गुरुं राजानमथवा मातृमायान्नतो नमेत्। पतिव्रतायां नार्यायां सदैव क्रतुसंगमः॥ क्रिः
यतेव गणिकां ध्यात्वा तदा कार्यविनृतये॥ शान्तिकं पौष्टिकं वापि तथैवापूर्वकर्मणि॥ यदा कुर्यान्न दागत्वा दे
विं नत्वा समाविशेत्। तोयं त्रिकं यदोपश्य देवानां गीतमेव वा॥ तत्र देवी निवेद्यैवं कर्त्तव्यं स्वोपयोजनं॥ [illegible]
[illegible] पूजांगं तत्॥ यदेव भूषणं वासो मलयोद्भवमेव वा॥ स्वकायपरिभुञ्जीत तत्र मन्त्राधिकान्यसेत्
। व्यायामैव विमाने वसन्तायां वा जले स्थले। यत्र यत्र सुसंगच्छे तत्र देवीं सदा स्मरेत्। यद्यत्कर्मप्रपूजांगं तत्तन्मः
त्रेण चार्पयेत्। मन्त्रहीनं पूजनाङ्ग कर्म कुर्यात्तु निःफलं॥ यस्मिन्कर्मनिसादिष्टो मन्त्रपूजासु भैरवा॥ नैवे
द्यालोकमन्त्रेण तत्तत्कर्म समाचरेत्॥ देव्यास्तु मण्डलं न्यास मिश्रमन्त्रेण वाचरेत्॥ पूजान्ते मण्डलं लिप्त्वाः
तिलकं तेन साधयेत्। सर्ववश्येन मन्त्रेण धर्मकामार्थदायिना॥ बलिदानेवलिं छित्वा खड्गे सोरुधिरैः स्वके
॥ सर्ववश्येन मन्त्रेण ललाटे तिलकं न्यसेत्। जगद्वश्यो भवेत्तत्र चतुर्थः कश्यवह्निना॥ षष्ठस्वरेणसंयुतः ॥राम॥
कला बिन्दुसमन्वितः। तथोपान्ततथान्त्य सपरोपि तथा पुनः॥ द्विमोहीति टकारस्य तुर्योहि स्वरसंयुतः ॥१६६॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तृतीयवर्गप्रान्तेन तृतीयस्वरसंज्ञिना॥पुरितास्तो द्विधावर्त्त तथावादिचतुर्थकः॥स्वरो द्वितीयस्य
तथा क्षोमनस्याद्यः पुरःसरः॥पुरेति सहितं सोपि मित्रसद्यपराक्रमः॥यथापुजानथाराजा पूर्वश्रा
स्वरतिश्रुतः॥विनापि पूजनं कुर्याद्यः क्षुद्रं तिलकं नरः॥मन्त्रेनानेन सततं सर्वस्तस्य वश्यो नवेन॥रा
जा वा राजपुत्रो वा स्त्रियो वा यस्स राक्षसाः। सर्वे ते॥सर्वे तस्य वशं यान्ति नूतया मास्वतुर्विधाः॥प्रवा
सेपथि वा दुर्गस्थाने प्राप्ते जलेपि वा। कान्तागारनिवद्धो वा भ्र या वेगगतोपि वा॥कुर्यात्तत्र मारुमाया
पूजां वै मानसीं बुधः। मनस्तुष्टे समुत्पन्ने सिंहव्याघ्रसमाकुले॥परचक्रागमे वापि कुर्यान्मानसपूजः
नं॥मनसा हृदयस्यान्ते ध्यात्वा योगात्मपीठकं। तत्रैव पृथिवीमध्ये पुजान्तत्र समाचरेत्॥मेवं प्रसाध
नं दन्तधावनकर्मकं अन्यच्च सर्वं मनसा ध्यात्वा कुर्याच्च पूजनं॥यथा पुष्पादिभिः पूजा वहिर्द्रव्यवि
मोनं ४ धीयते। तथा हृद्यपि कर्त्तव्याः सर्वाश्च प्रतिपत्तयः॥अष्टमासं सततं देवी याजकः स्यात्सदाव्रती॥न
वमासं तु तथा पूजा कर्त्तव्या निजशोणितेः॥लिङ्गस्थां पूजयेद्देवीं पुस्तकस्थां तथैव च। स्थण्डिलस्थां महा
मायां पादुके प्रतिमासु च॥चित्रे च विशिखखड्गे जलस्थां वापि पूजयेत्। पञ्चदशाङ्गुलं खड्गं त्रिशि

खंच त्रिशूलिनं॥ शिलायां पर्व्वतस्याग्रे तथा पर्व्वतगह्वरे। देवीं संपूजयेन्नित्यं भक्तिश्रद्धासमन्वितः॥ वारा
णस्यां सदा पूजा संपूर्णफलदायिनी। उत्कले द्विगुणा प्रोक्ता पुरुषोत्तमसन्निधौ॥ ततो पि द्विगुणा प्रो
क्ता द्वारवत्यां विशेषतः। सर्व्वक्षेत्रेषु तीर्थेषु पूजा द्वारवतीसमा॥ विंध्ये शतगुणा प्रोक्ता गंगायामपि तत्
समा॥ आर्यावर्त्ते मध्यदेशे ब्रह्मावर्त्ते तथैव च॥ विंध्यवत्फलदा पूजा प्रयागे पुष्करे तथा। ततश्चतुर्गुणं
प्रोक्तं करतोयानदीजले। तस्माच्चतुर्गुणफला नन्दिकुण्डे च भैरवे॥ ततश्चतुर्गुणा प्रोक्ता जल्पीशेश्वरस
न्निधौ। ततः सिद्धेश्वरीयोनौ ततोपि द्विगुणा स्मृता। ततश्चतुर्गुणा प्रोक्ता लौहित्यनदपाथसि॥ तत्समा का
मरूपेतु सर्व्वत्रैव जले स्थले। सर्व्वश्रेष्ठा यथा विष्णु र्लक्ष्मीः सर्व्वोत्तमा यथा॥ देवीपूजा तथा शस्ता कामरूपे
सुरालये। देवीक्षेत्रं कामरूपं विद्यतेन्यं न तत्समं। तान्यत्र विरला देवी कामरूपे गृहे गृहे॥ ततः शतगुणं
प्रोक्तं नीलकूटस्य मस्तके॥ तत्रापि द्विगुणं प्रोक्तं नेपालेयोनिमण्डले॥ ततः शतगुणं प्रोक्ता हेरुके लिंगमू
र्द्धनी। ततोपि द्विगुणा प्रोक्ता शैलपुत्र्यादियोनिषु। ततः शतगुणं प्रोक्तं कामाख्यायोनिमण्डले। कामाख्यायां
महामायाः पूजां यः कृतवान्नरः। स चेह लभते कामान् परत्र शिवरूपतां॥ ततस्य सदृशो न्योस्ति कृत्यं तः

स्यनविद्यते। वाञ्छितार्थमवाप्नोति चिरायुरपि जायते॥ वायोरिव गतिस्तस्य सर्वेदन्यैव रूपता। संग्रामे
शास्त्रवादे च दुर्जयः सर्वजायते॥ वैष्णवीतन्त्रमन्त्रेण कामाख्यायोनिमण्डले॥ संपूज्य तु पूजनं कृत्वा फलं
शतगुणं लभेत्। मूलमूर्त्तिर्म्महामाया योगनिद्रा जगन्मयी॥ तस्यास्तु वैष्णवीतन्त्रं प्रागेवप्रपादितं। अ
न्याया मूर्त्तयः प्रोक्ताः शैलपुत्र्यादयोपराः॥ तस्या एव विनाशास्तास्तच्छरीर विनिर्ग्गताः। निःसरन्ति
यथा नित्यं सूर्यबिम्बान्मरीचयः॥ देव्यस्तथोग्रचण्डाद्या नमो हों याश्शरीरजाः। तासामेवायुमन्त्राणि वन
व्याणि मयातव॥ एकैव तु महामाया कामार्थं भिन्नतां गता॥ कामाख्यातु महामाया मूलमूर्त्तिः प्रगीयते॥
पीठे भिन्नाख्यया सातु महामाया प्रगीयते। एवमेव यथा विष्णुर्न्नित्यत्वादिसनातनः। जनानामर्द्दनात्सो
पि जनार्द्दन इति स्मृतः॥ तथैवैषा महामाया कामार्थं संगता गिरौ। कामाख्येति सदा देवैर्गीयते सततं न
रैः॥ यथा हि पुरुषः कश्चि छ्वीकृत्य यहास्तवेत्॥ स्नापकः स्नानकालेपि कामाख्या ति तथा स्वया। महामाया
शरीरं तु कामार्थं समुपस्थितं॥ लोहितं कुंकुमैः पीनं कामार्थमुपयोजितैः। रक्तं त्यक्त्वा कामकाले साग
क्तातिश्रजं स्वयं॥ यदा तु त्यक्त्वा कामाख्या तदा स्याद सिधारिणी। कामकाले शिनं प्रेत्य न्यस्तलोहितपंकजं॥

नि०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वरं तेत्यक्तकामा तु शितप्रेतोपरि स्थिता॥ तथैव तु स्तुतो गत्वा सिंहस्था कामदा नवेत्॥ कदाचित्स्वा शि
तप्रेते कदाचिद्रक्तपंकजे। कदाचिच्चैकचारीएहैः रमते कामरूपिणी॥ यदा लोहितपद्मस्था तदाग्रे केश
रीशवः। यदा प्रेतगता देवी तदाग्रेत्पं निरीक्ष्यते॥ महामायास्वरूपेण यथासौ वरदा नवेत्। पूजाकालेस्व
दाप्रेत्य पद्मसिंहोपरि स्थिता॥ रक्तपद्मयदाध्यायेत्तदाग्रे चिन्तयेद्धरिं। यदाध्यायेद्धरौ चान्यद्धयमग्रे
विचिन्तयेत्। त्रिषुध्यायेषु युगपत् प्रतिपूज्यहरौ क्रमात्॥ स्थितेषु कामदा देवी तेषु ध्यानानि कामदा॥ ए
केकस्मिन्नपि तथाऽग्रथा वा चिन्तयेच्छिवां॥ एकां समस्तजगतां प्रकृतिमायतस्ततः॥ विष्णुर्ब्रह्मशिवोनि
त्यं ध्रियते सा जगन्मयी॥ शितप्रेतो महादेवो ब्रह्मा लोहितपंकजः॥ हरिर्हरिस्तु विज्ञेयो वाहनानि महौज
सः॥ स्वमूर्त्या वाहनं तत्र तेषां यस्मान्न युज्यते। तस्मान्मूर्त्यन्तरं कृत्वा वाहनत्वं गतास्त्रयः॥ यस्मिन्यस्मिं
न्महामायापीठानि सततं शिवा। तेन तेन वरूपेन नित्यं[illegible]स्मान्यनस्त्रयः॥ सिंहोपरि स्थितं युक्तं पद्मान्तः
स्थोर्द्धगः शिवः। तस्योपरि महामाया वरदा नयधारिणी॥ एवंरूपेण यो ध्यात्वा पूजयेत्सततं शिवां। ब्र
ह्मा विष्णु शिवा न्तेन पूजिता स्युरशंसयः॥ एवं सदा महामाया कामाख्या चैवरूपिणी॥ ध्यानतो रूपतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिन्ना तस्मात्तान्तु प्रपूजयेत्॥ एवं विशेषतन्त्राणि दुर्गायाः कथितानि वः॥ अङ्गमन्त्राणि तस्यास्तु शृणुयत्नाद्द्वि
जसत्तमाः॥ ॥इति श्रीकालिकापुराणे पूजाख्याने सप्तपञ्चाशोऽध्यायः॥ ५७ ॥ ॥श्रीभगवानु
वाच॥ अङ्गमन्त्रानहं वक्ष्ये चण्डिकाया विशेषतः। यैः समाराधिता देवी चतुर्वर्ग्गप्रदा भवेत्॥ तालव्यासंपु
तः षष्ठः स्वरबिन्द्विन्दुवह्निभिः। नघोयान्तोयुतस्त्वेतै राज्यं वास्रवमुच्यते॥ नेत्रबीजं चण्डिकायास्त्र्यमेतत्प्र
कीर्त्तितं॥ वामे ललाटे दक्षिणे नेत्रेषु द्वितयं क्रमात्॥ धर्म्मार्थकाममोक्षाणां सर्वदा कामदं परं॥ मन्त्रमे
तन्महागुह्यं दुर्गाबीजमिति श्रुतं॥ यदा कात्यायनमुने राश्रमेषु दिवौकसां। तेजोभिर्द्दत्तकामोभूद्देवीदे
वौघसंस्तुता॥ यथा नेत्रत्रया देव्या मूलमूर्त्या विनिःसृता॥ तेजोमयि जगद्धात्री महिषासुरघातिनी॥ तेजो
भिः सर्वदेवानां सा भूत्वा वपुरुत्तमं॥ अस्त्राण्येकमादाय देवैर्द्दत्तानि नागराः॥ शरांसान्तु वन्ध्यस्त्र सम
गोत्करवाहना॥ ब्रह्माद्यैः संस्तुता देवी जघान महिषासुरं॥ हतेतु महिषे देवी पूजिता त्रिदशैस्तथा॥ अने
नेवतु मन्त्रेण लोके ख्यातिमुपागता॥ ततः प्रभृति सा देवी सर्वैः सर्वत्र पूजिता॥ मूलमूर्त्तिः सुगुप्ताभू
त्तन्मूर्त्तिः ख्यातिमागता॥ देवानां वरदानेन ब्रह्माद्यैरुपयोजनात्॥ या मूर्त्तिः पूज्यते सर्वैः सा मूर्त्तिः श्रूयता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

का॰पु॰ १६९ नैरव॥ जटाजूटसमायुक्ता मर्द्धेन्दुकृतशेखरां। लोचनत्रयसंयुक्तां पद्मेन्दुसदृशाननां॥ तप्तकाञ्चनवर्ण्णा
भां सुप्रतिष्ठां सुलोचनां। नवयौवनसंपन्नां सर्व्वाभरणभूषितां। सुचारुदशनां तीक्ष्णां पीनोन्नतपयोधरां
। त्रिभंगिस्थानसंस्थानां महिषासुरमर्द्दिनीं॥ मृणालायतसंस्पर्शदशबाहुसमन्वितां॥ त्रिशूलं दक्षिणे
दद्यात् खड्गं चक्रं क्रमादधः॥ तीक्ष्णबाणं तथा शक्तिं बाहुसंघेषु संगतिं॥ खेटकं पूर्णचापञ्च पाशंचा
कुशमेवच॥ घण्टान्वा परशुं वापि वामेधः प्रतियोजयेत्। अधस्तान्महिषं तद्वद्विशिरस्कं प्रदर्शयेत्॥
शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनं॥ हृदि शूलेन निर्भिन्नं निर्यदन्त्रविनिःसृतं। रक्तवक्त्रीकृताङ्ग
ञ्च रक्तविस्फुरितेक्षणं। वेष्टितं नागपाशेन भ्रुकुटीकुटिलाननं॥ सपाशवामहस्तेन धृतकेशं च दुर्गया॥
वमद्रुधिरवक्त्रञ्च देव्याः सिंहं प्रदर्शयेत्। देव्यास्तु दक्षिणं पादं समं सिंहोपरि स्थितं। किञ्चिदूर्द्ध्वं तथा वाम
मंगुष्ठं महिषोपरि॥ उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका। चण्डा चण्डवती चैव चण्डिका चण्डिका तथा॥ इ
त्याभिः शक्तिभिरष्टाभिः सततं परिवेष्टितां॥ चिन्तयेत्सततं देवीं धर्म्मकामार्थमोक्षदां। एतस्याप्यङ्गमन्त्रं तु रामः
दुर्गातन्त्रमिति स्थितं॥ शृणु चैकमना भूत्वा धर्म्मकामार्थसाधनं। वह्निनाथस्वरः षष्ठ वान्तः प्रान्तोग्निरेवच १६९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥दुर्गे विविशितिसाक्षारं दुर्गातन्त्रमितिश्रुतं। रवौ मकरराशिस्थे या तु वै शुक्लपञ्चमी। तस्यामनेन संपूज्या
मन्त्रेण विधिवच्छिवा। शुक्लाष्टम्यां पुनर्देवीं पूजयित्वा यथाविधि॥ नवम्यां बलिदानानि प्रभूतानि समा
चरेत्। संध्यायाञ्च बलिं कुर्यान्निजगात्रासृगुक्षितेः॥ एवं कृते तु कल्याणि सर्ज्ञो नित्यं प्रमोदते। पुत्रपौत्र
समृद्धिस्तु धनधान्यसमन्वितः॥ दीर्घायुः सर्व्वसुभगो लोकेस्मिन्सञ्जायते। सिताष्टम्यान्तु चैत्रस्य शिशु
तेस्तत्कालसंभवैः॥ अशोकैरर्पियः कुर्यान्मन्त्रेनानेन पूजनं। न तस्य जायते शोको रोगो वाप्यथ दुर्गति
ज्येष्ठशुक्ले तथाष्टम्यां नियमैः समुपोषितं। नवम्यां सतिलैर्व्वस्त्रैर्यवकैः रथमोदकैः॥ क्षीरैराज्यैस्तथा
क्षौद्रैर्मदिराभिः सपिष्टकैः॥ नानापशूनां रुधिरैर्मांसैश्च पितृपूजने॥ ततो दशम्यां शुक्लाया मञ्जिष्टुनि
लमिश्रितेः॥ दुर्गातन्त्रेण मन्त्रेण दातव्यं मंजलित्रयं। एवं कृते दशम्यान्तु यत्पापं दशजन्मकं॥ कृतं तन्न
लयं याति दीर्घायुरपि जायते॥ आषाढे शुक्लपक्षस्य चाष्टमीश्रवणास्य वा। पवित्रारोहणं कुर्यात् देवीप्रीति
करं परं। दुर्गातन्त्रेण मन्त्रेण दुर्गावीजेन नैरव। वैष्णवीतन्त्रमन्त्रेन पवित्रारोहनं चरेत्। विशिष्टश्रा
वणमासि देव्याः कुर्यात्पवित्रकं॥ सर्व्वेषामपि देवानां पवित्रारोहनञ्चरेत्। आषाढेश्रावने वापि सन्वत्स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का०पु०
१७०

रफलप्रदं॥ प्रतिपद्धनदस्योक्ता पवीत्रारोहने तिथिः। श्रियादेव्या द्वितीया तु तिथीनामुत्तमास्मृता॥ तृती
या भवना विन्याश्चतुर्थी तत्सुतस्य च। पञ्चमी सोमराजस्य षष्ठी प्रोक्ता गुहस्य च॥ सप्तमी भास्करस्योक्ता दुर्गा
याश्च तथाष्टमी। मातॄणां नवमी प्रोक्ता वासुकेर्दशमी तथा॥ एकादशी ऋषीणां च द्वादशी चक्रपाणिनः। त्रयो
दशी त्वनंगस्य मम चैव चतुर्द्दशी॥ ब्रह्मणोदीकृतीनां च पौर्णमासी तिथिर्मताः। पवित्रारोहनं यावत् दे
वानां च समाचरेत्॥ तस्य सांवत्सरी पूजा पलं हरति केशवः तस्माद्यत्नेन कर्त्तव्यं पवित्रारोहनं परं॥ दी
क्षितो [illegible] यते मन्त्रं पवित्रारोहनं विना निःफलं तस्य तन्मन्त्रं योगिनी भक्षयेत्कुलं॥ लोभान्मोहाद्विषादाद्वा
योपवित्रं न चाचरेत्। तस्य कर्म्माणि सर्वाणि निःफलं निश्चयं भवेत्॥ क्रियते बहु पुण्यं स्यात्। तत्पूजासुफ
लं भवेत्। पवित्रं येन सूत्रेण तथा कार्यं विजानता॥ तत्तु गाङ्गेय प्रमानन्तु वचनात्सव नैरव। प्रथमं दर्भसूत्रं
च पट्टसूत्रं ततः परं॥ ततः क्षौमं तत्तु पराणं स्यात्कार्पासमतः परं॥ यद्दसूत्रं तथान्येन पवित्राणि च कारये
त्॥ विचित्राणि पवित्राणि कर्त्तव्यादिप्रयत्नतः। गन्धैर्माल्यैः सुरभिभिः रर्चिता नियथोचितं॥ कन्यासु का
र्त्तितं सूत्रं प्रमदा च पतिव्रता। विधवा साधुशीला वा दुःशीला न हि कर्त्तयेत्॥ यत्सूत्रं विभिन्नं दग्धं च नस्म

राम:
१७०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धूमाग्निगुणितं तद्वर्जयीत यत्नेन सूत्रमस्मिन्पवित्रके ॥ उपयुक्तं चाथ दग्धं मयूरक्ताद्दिदूषितं मलिनं
रक्तनीलस्त्र प्रयत्नेन विवर्जयेत् ॥ सूत्रैः पवित्रकं कुर्वीत कनिष्ठोत्तममध्यमं ॥ कनिष्ठं यत्पवित्रन्तु सप्त
विंशतितन्तुभिः ॥ मर्त्यलोके यशःकीर्तिः सुखसौभाग्यवर्द्धनं ॥ चतुःपञ्चाशता पूर्वं तन्तूनां मध्यमं परं ॥
दिव्यभोगावहं पुण्यं सुखमोक्षप्रदायकं ॥ उत्तमं चैव तन्तूनामष्टोत्तरशतेन वै ॥ तद्दत्वा तु महादेवाय शि
वसायुज्यमाप्नुयात् ॥ उत्तमं वासुदेवाय दद्याद्यादि पवित्रकं ॥ तया याति हरेर्लोकं साधको नात्र संशय :
॥ अष्टोत्तरसहस्रन्तु रत्नमालेति गीयते ॥ पवित्रन्तु महादेव्या भुक्तिमुक्तिप्रदायकं ॥ रत्नमालान्तु यो दद्या
न्महादेवे पवित्रकं ॥ कल्पकोटिसहस्राणि स्वर्गे स्थित्वा शिवो भवेत् ॥ एवन्तु नागहाराख्यं शंकरस्य पवित्र
कं ॥ अष्टोत्तरसहस्रेण तन्तूनां सुमनोहरं ॥ यः प्रयच्छति मह्यन्तु स यावत्तन्तुसञ्चयः ॥ तावत्कल्पसहः
स्राणि ममलोके महीयते ॥ अष्टोत्तरसहस्रेण वनमाला हरेः स्मृता ॥ तन्तूनां तस्य दानेन विष्णुसायुज्यः
माप्नुयात् ॥ यत्कनिष्ठं पवित्रन्तु नाभिमात्रं भवेत्तु तत् ॥ द्वादशाग्रंथिसंयुक्तं मानमानेन योजयेत् ॥ उरः
प्रमाणं मध्यं स्यात् ग्रन्थीनां तत्र योजयेत् ॥ चतुर्विंशतिमध्यस्य मानसान्मानमेव च ॥ पवित्रमुत्तमं प्रोक्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

का०पु०
१७१

५२८३ १ ग्रंः

जानुमात्रं च भैरव ॥ षट्त्रिंशत्तन्तुभिर्नां योजयेदात्ममानतः । नागहारान्वयन्तद्वद् दन्तेषु च विधानतः । पवित्रं
क्रियते येन सूत्रेन यंकुर्यः पुनः ॥ तदस्य वर्णसूत्रेण कर्त्तव्यालक्षणान्विताः ॥ ग्रन्थिस्तु सप्तभिः कुर्यात्
वेष्टनेस्तु कनिष्ठके द्विगुणो मध्यमे कुर्यात् त्रिगुणोऽन्तमानतः ॥ अधिवासपवित्राणि पूर्वस्मिन् दिव
सेततः । मन्त्रंन्यासं पवित्रेतु कुर्यात्तत्रापरेऽहनि ॥ दुर्गाबीजेन तन्त्रेण मन्त्रन्यासं द्विजश्रेष्ठ रेते । वेस्तवेत
न्त्रमन्त्रेण कुर्युरन्येतु भैरव ॥ प्रतिग्रन्थिस्वयंकुर्यात्मंत्रंन्यासं विचक्षणः ॥ अङ्कुशाग्रेन जपनं माला
यामिह भैरव ॥ यावत्ताग्रन्थयस्तत्र तावन्त्येव च संन्यसेत् । मन्त्राणि तेन तन्त्रस्थः स्याद्देवांशोपनियोजये
त् ॥ दुर्गातन्त्रेण मन्त्रेण तत्वन्यासं प्रधारयेत् । एतत्तन्त्रस्य सकलं यत्तपात्रे पवित्रकं ॥ तस्मिन्विधायग
न्धादिपुष्पाणि नवशोभनं । तत्वन्यासं ततः कुर्याद् दक्षिणेन भैरव ॥ विष्णोस्तु मूलमन्त्रेण तत्वन्यासस्त्रः
कारयेत् । इति विष्णोरिति प्रोक्तं मन्त्रं न्यासं द्विजस्य हि ॥ सूर्य्याणां मन्त्रविन्यासो मन्त्रा वेदादयास्मरः
प्रासादेनतु मन्त्रेण तत्वन्यासे समन्त्रकं ॥ अनेन मंत्रन्यासश्च दानं चानेन कारयेत् । कुंकुमागुरुख रामः
र्पूरैश्चन्दनानि विलेपनैः । पवित्राणि विलिप्याथ तत्वंन्यासं च योजयेत् ॥ संपूज्य मण्डले देवीं वि १७१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

षिवन्प्रयत्नेननरैः।वैष्णवीतंत्रमन्त्रेण॥पूजयित्वाप्रयत्नतः।दुर्गाबीजेनदद्यात्तुदेव्यामूर्त्तिपवित्रकं॥यस्य
देवस्ययापूजा तस्यतस्यैवमण्डले॥यस्ययस्यतुयामन्त्रोयथाध्यानादिपूजनं॥तद्देवंतेनभावेनःपू
जयित्वाप्रयत्नतः॥तस्यैवबीजमन्त्रेणत्वांमूर्ध्निदद्यात्पवित्रकं॥पवित्रात्समयेदद्याद्देवेभ्यश्चपवित्रकं
।सर्वेषामेवदेवानांसंपूर्णार्थस्यभैरव॥अग्निर्ब्रह्मानवानीचगजवक्त्रोमहोरगः।स्कन्दोभानुर्मातृगः
णाः॥दिक्पालाश्चनवग्रहाः॥एषांचदेवेषुप्रत्येकंपूजयित्वायथाविधि।मूर्त्तिपवित्रमेकैकंदद्याद्देवेः
प्रयत्नतः॥पञ्चगव्यंचरुंकृत्वादेव्यैदत्वाहुतित्रयं।तिसेवबिल्वैर्हुत्वाशांतंनैवेद्ययथाविधि॥आज्येन
ष्टोत्तरशतंतिलैराज्यसाधेवहि।अष्टोत्तरशतंदद्यात्महादेव्यैचसाधकः।एवमेवविधानेनविष्णवादीः
नांश्चभैरवः॥पवित्रारोहणंकुर्याद्धर्मकामार्थसिद्धये॥नैवेद्यैर्विविधैःपेयैर्घटपिष्टकमोदकैः।कु
ष्माण्डनारिकेलैश्चखर्जुरैःपनसैस्तथा॥आम्रदाडिमकर्कारुद्राक्षादिविविधैःफलैः॥तस्यनोज्या
५२ दिभिःशैर्मत्स्यमांसैस्तथौदनैः॥गन्धपुष्पैस्तथाधूपैर्दीपैश्चसुमनोहरैः॥वासोभिर्भूषणैर्नव्यैर्नैवा
नीसाधकोयजेत्॥नटनर्त्तकसंघैश्चवेश्याभिश्चैवभैरव॥नृत्यगीतैःसमुदितोजागरंकारयेन्नि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शि। भोजयेद्ब्राह्मणांश्चापि ज्ञातीनपि द्विजातिभिः॥ पवित्रारोहणे हूते दक्षिणामुपपादयेत्। हिरण्यं
गाश्च धेनूश्च वासो वा शाकमेव वा॥ इदं मन्त्रं ततः पश्चात् साधकः समुदीरयेत्। मणिविद्रुममालाभि
र्मन्दारकुसुमादिभिः॥ इदं साम्वत्सरी पूजा तवास्तु परमेश्वरी। ततो विसर्जयेद्देवीं पूर्वाभिः प्रतिप
त्तिभिः॥ एवं कृते पवित्राणां दाने देव्या यथाविधि। साम्वत्सरस्य या पूजा संपूर्णा वत्सरा भवेत्॥ कल्प
कोटिसहस्राणि देवीगेहे वसेन्नरः॥ अत्रापि सुखसौभाग्यं समृद्धिमुत्तमां लभेत्॥ ॥ इति श्रीका
लिकापुराणे पवित्रारोहणं अष्टपंचाशोध्यायः॥ ५८॥ ॥श्रीभगवानुवाच॥ दुर्गोत्सवेन महता कु
र्याद्देव्या महोत्सवं। महानवम्यां शरदि बलिदानं नृपादयः॥ आश्विनस्य तु शुक्लायां भवेद्याष्टमी तिथि
ः महाष्टमीति सा प्रोक्ता देव्याः प्रीतिकरा परा॥ ततोऽनु नवमी यास्यात् सा महानवमी स्मृता। सा तिथिः सर्व
लोकानां पूजनीया शिवप्रिया॥ अनयोर्वत्सरं पूजा विशेषं शृणु भैरव॥ मूर्त्तिभेदे यथा देवी पूजा गृह्णा
ति भूतये। कन्यासंस्थे रवौ वत्स शुक्लमारभ्य नन्दकं। उपवास्यथ नक्ताशी एकाशी त्वथवा नृपः॥ प्रातः
स्नायी च निर्द्वन्द्वः शिवलिंगप्रपूजकः॥ जपहोमसमायुक्तो भोजयेद्वै कुमारिकाः॥ बोधयेद्बिल्वशाखाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वामुख्यां देवीं फलेषु च॥ सप्तम्यां बिल्वशाखान्तां समाहृत्य प्रतिपूजयेत्॥ ततः पूजां तथाष्टम्यां विशेषेणः
समाचरेत्॥ जागरञ्च स्वयं कुर्याद्बलिदानं महानिशि॥ प्रभूतबलिदानन्तु नवम्यां विधिवच्चरेत्॥
ध्यायेद्दशभुजां देवीं दुर्गातन्त्रेण पूजयेत्॥ विसर्जनं दशम्यान्तु कुर्याद्वै शारदोत्सवैः॥ कृत्वा विसर्ज
नं तस्याः पश्चात्तन्तां समाचरेत्। यदा तु षोडश पूजां महामायां प्रपूजयेत्॥ दुर्गातन्त्रेण मन्त्रेण विशे
षेण च वैश्वापदे। कन्यायां कृष्णपक्षस्य एकादश्यामुपोषितः॥ द्वादश्यामेकभक्तं तु नक्तं कुर्यात्परेहः
नि। चतुर्दश्यां महामायां बोधयित्वा विधानतः॥ गीतवादित्रनिर्घोषैर्नानानैवेद्यवेदनैः॥ त्रियाचि
नवुवः कुर्यादुपवासं परेऽहनि॥ एवमेव व्रतं कुर्याद्यावद्वै नवमी भवेत्। ज्येष्ठायाञ्च समन्यत्रौ मू
लेन प्रतिपूजयेत्॥ उत्तरेणार्च्चनं कुर्याच्छ्रवणेन विसर्जयेत्। यदा त्वष्टादशभुजां महामायां
प्रपूजयेत्॥ दुर्गातन्त्रेण मन्त्रेण तत्रापि श्रूयते परः। कन्यायां कृष्णपक्षस्य पूजयित्वाष्टमे दिवा न
वम्यां बोधयेद्देवीं गीतवादित्रनिःस्वनैः॥ शुक्लपक्षे चतुर्थ्यान्तु देव्याः केशविमोक्षणं॥ प्रातरेव तु
पञ्चम्यां स्नापयेत्सुरभिजलैः॥ सप्तम्यां पत्रिकापूजा अष्टम्यां चाप्युपोषणं॥ पूजा जागरणं चैव नव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म्यां विधिवद्बलिं गासंप्रेषणांकुञ्जदान क्रीडाकौतुकमंगलैः॥ नीराजनं दशम्यां तु बलिवृद्धिकरं महत्।
यदा तु वैष्णवी देवी महामाया जगन्मयी॥ पूजयेत्तत्र वै तदा विशेषं शृणु भैरव॥ कन्यासंस्थे रवौ पूजा
याशुक्ला तिथिरष्टमी॥ तस्यां रात्रौ विधातव्या महाविभवविस्तरैः॥ नवम्यां बलिदानन्तु कर्त्तव्यं वै यथाः
विधि॥ जपहोमञ्च विधिवत्कुर्यात्तत्र विभूतये संपूजयेन्महादेवी मष्टपुष्टिकया नरः॥ रामस्यानु
ग्रहार्थं वै रावणस्य वधाय वै॥ रात्रावेव महादेवी ब्रह्मणा बोधिता पुरा॥ ततस्तु त्यक्तनिद्रा सा नन्दायां
त्वाश्विने सिते॥ जगाम नगरीं लंकां महामाया ततः स्वयं॥ तत्र गत्वा महामाया नदतौ रामलक्ष्मणौ॥ यु
द्धे नियोजयामास स्वयमन्तर्हिताम्बिका॥ रक्षसां वानराणां च जघान मांसशोणिते॥ रामरावणयोर्यु
द्धं सप्ताहं सन्न्ययोजयेत्॥ व्यतीते सप्तमी रात्रौ नवम्यां रावणं ततः॥ रामेन घातयामास महामाया जगन्म
यी॥ यावत्तयोः स्वयं देवी युद्धकेलिमुदीक्षते॥ तावत्तु सप्तरात्राणि सर्वदेवैस्तु पूजिता॥ निहते
रामणो वीरे नवम्यां सकलैः सुरैः॥ विशेषपूजां दुर्गाया चक्रे लोकपितामहः॥ ततः संप्रस्थिता देवी द
शम्यां शारदोत्सवे॥ शाकोपि दैवसेनाया नीराजनमथाकरोत्॥ शान्त्यर्थं सुरसेनानां देवराजस्य वृद्धये॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योरामरावणाभ्यां वाहोन युद्धं वावेक्ष्यामीतिदं॥ तृतीयायान्तु लंकायाः पूर्वोत्तरदिग्विस्थितां। स्वातीनक्षत्र
युक्तायां सीतं सुरवलं महत्। स्थानान्यर्थं वारयामास देवेन्द्र वचनाद्धरिः॥ ततस्तु श्रवणोनाथ दशम्या
वगौडिकान्सुतां। विसृज्य वकैस्थान्यर्थं वलं नीराजनं हरिः॥ नीराजितवरः शक्र स्तत्र रामश्च राघवः
वं॥ सन्ताप्य प्रययौ स्वर्गं सह देवैः शचीपतिः॥ इति वृत्तं पुराकल्पे. मनोः स्वायंभुवेन्तरे। प्रादुर्भूता
दशभुजा देवी देवहिताय वै॥ त्रेतायुगस्यादौ. जगतां हितकाम्यया। पुराकल्पे यथावृत्ते प्रतिक
ल्पं तथा तथा॥ प्रवर्त्ते तथ स्वयं देवी दैत्यानां नाशनाय वै। प्रतिकल्पं नवेद्रामो कल्पे कल्पेषु रावणः॥
तथैव जायते युद्धं तथा विदशासंगमः। एवं राम सहस्राणि रावणस्य तथैव च॥ नवितव्याणि भूमाः
नि तदा देवी प्रवर्त्तते। पूजयन्ती सुराः सर्व्वे वलं नीराजयन्त्यपि॥ तथैव च नराः सर्व्वे कुर्युः पूजाय
था विधि। वलं नीराजनं राजा कुर्याद्वल विवृद्धये॥ दिव्यालंकारयुक्तानि र्वानिनीभिः प्रवर्त्तनं। क
र्त्तव्यं नृत्यगीतानि क्रीडाकौतुकमंगलं॥ मोदकैः पिष्टकैः पेयैर्नक्षैर्भोज्यैः सहस्रकैः॥ कूष्माण्डैर्नारि
केरैश्च खर्जुरैः पनसैस्तथा॥ द्राक्षामलकशाण्डिल्यैः श्रीहस्त्यवहासैस्तथा। कशेरुकमुकैर्मूले स्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लाजस्वस्तिकादिभिः ॥ वनप्रियैस्तु नैवेद्यैर्लाजाक्षतफलादिभिः ॥ गवोरुडैस्तथा मांसैर्मज्जैर्मधुरद्रव्य
कैः ॥ इक्षुदण्डैः शिताभिश्च लवनीनागरंगकैः ॥ अजालिर्महिषैर्मेषैरात्मशोणितसंभवैः ॥ पक्षादि
बलिदानैश्च तथा च विविधैर्मृगैः ॥ पूजयेज्जगतां धात्रीं मांसशोणितकर्द्दमैः ॥ राज्ञो स्कन्दविशाखौ
च हेतोपिष्टकपुत्रिका ॥ पूजयेत्कुत्रुनाशाय दुर्गायाः प्रीतये तथा । हिमत्रु सतिले राज्ञैः समांसैर
पिचाचरेत् ॥ गुग्गुलरोजदिकाः पूज्यास्तथा शैयोगिनीषु ताः ॥ योगिनीश्च चतुःषष्टिस्तथा वै कोटिः
योगिनी ॥ नवदुर्गास्तथा पूज्या देव्याः सन्निहिताः शुभाः ॥ येऽन्नादीनगन्धपुष्पैस्तादेव्या मूर्त्तयो
यतः ॥ देव्याः सर्व्वाणि चास्त्राणि भूषणानि तथैव च ॥ अंगप्रत्यंगयुक्तानि वाहनं सिंहमेव च ॥ महि
षासुरमर्द्दिन्याः पूजायां नूतये सदा ॥ पुराकल्पे महादेवी मनोः स्वायंभुवान्तरे ॥ नृणां कृतयुगस्यादौ सु
वैर्देवैः स्तुता तदा ॥ महिषासुरनाशाय जगतां हितकाम्यया ॥ योगनिद्रा महामाया जगद्धात्री जगन्म
यी ॥ भुजैः षोडशभिर्युक्ता नडकालीति विश्रुता ॥ क्षीरोदस्योत्तरे कूले विभ्रती विपुलां पुनः ॥ अतसी
पुष्पवर्णाभा ज्वलत्काञ्चनकुण्डला ॥ जटाजूटे मखन्दुद्रु मुकुटत्रयभूषिता ॥ नागहारेणसहितस्वर्ण

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हारैर्विराजिता॥ शूलखड्गश्च शंखं च चक्रबाणां तथैव च। चापानि बलश्च दण्डश्च नित्यं दक्षिणबा
हुभिः॥ बिभ्रती सततं देवी विकसद्दशनोज्वला। खेटकश्चर्म्मचापश्च पाशं चांकुशमेव च॥ घण्टापर्शु
चमुशलं बिभ्रति वामपाणिभिः॥ सिंहस्थानयनैरक्त वर्ण्णास्त्रिभिरतिज्वला॥ शूलेन महिषं भि
त्वा तिष्ठन्तीं परमेश्वरी। वामपादेन चाक्रम्य तत्र देवी जगन्मयी॥ तां दृष्ट्वा सकला देवाः प्रणम्य पर
मेश्वरीं। प्रोचुः किञ्चिन्नतं दृष्ट्वा निहतं महिषासुरं॥ ततः प्रोवाच देवांस्ता ब्रह्मादीन्परमेश्वरी॥ स्मि
तप्रभिन्नवदना विकाशिनयनोज्वला। गच्छन्तु नोसुरगणाः जम्बुद्वीपान्तरं प्रति॥ हिमवत्पर्वता
सन्ने वरं कात्यायनाश्रयं॥ तत्रैव नवतां साध्यां शिद्धिर्भवति निश्चितं। इत्युक्त्वा स महादेवी तत्रैवा
न्तरधीयत। देवापि ते तदा जग्मुः कात्यायनमुनेः पुरं॥ आश्रमं पतितान्नत्वा विस्मयाविष्टचेतसः
।निहतो महिषो देव्या दृष्टास्माभिर्यदच्युतः॥ स्तुता चैषा जगद्धात्री महादेवी जगन्मयी। किमर्थमाह
सा देवी गन्तुं कात्यायनाश्रयं॥ किमन्यद्वाञ्छितं कार्यं युष्माकम्वा न विद्यते॥ इति ब्रुवन्तस्ते देवा ग
च्छन्तिस्म परस्परं। हिमवत्पर्वतासन्नं मुनिं कात्यायनाश्रमं॥ तत्र सेन्द्राः सदिक्पाला ब्रह्मविष्णुशिवा

त्वया ॥ निषिद्धस्तु चिरं प्रीता दुर्गा दर्शनलालसाः ॥ ततो रुद्रगणाः सर्व्वे महिषासुरवेष्टितं । आगता
कथयामासुः स्वर्गलोकपराभवं ॥ तत्र तत्र महाकोपं ब्रह्मा विष्णु शिवादयः । चक्रुः कोन्यो सि महिषा
हतो देव्यासदानवः ॥ पुनर्यैन हन्यते जगद्विध्वंसनं कृतं । इति प्रकुप्यतां तेषां शरीरेभ्यः पृथक्पृथ
क् ॥ निश्चक्रमुस्स्व तेजांसि. शक्तिरूपाणि तत्क्षणात् । ततस्तेजोभिर्द्दृष्टवती. देवी कात्यायनेन वै ॥ सन्तुष्टि
ता पूजिता च. तेन कात्यायनी स्मृता । ततस्तेनैव रूपेण दशबाहुयुतेन वै ॥ पश्चाज्जघान महिषं जगद्धा
त्री जगन्मयी ॥ यदा तु नाम महादेवी. बोधिता वाश्विने स्वयं । चतुर्द्दश्यां कृष्णपक्षे प्रादुर्भूता जगन्मयी ॥ देव
ना तेजसा मूर्त्तिः शुक्लपक्षे सुशोभनं । सप्तम्यां साकरोद्देवी अष्टम्यां तैरलंकृता. नवम्यां सुपहारैस्तु पू
जिता महिषासुरं । निजघान दशम्यान्तु विसृष्टान्तर्हिता शिवा ॥ ॥ श्रीमार्कण्डेय उवाच ॥ श्रु
त्वैमां सगरो राजा देव्याः संगतिमुत्तमं । संशयानस्ततद्भूपे पुनरेवं समपृच्छत ॥ ॥ श्रीसगर उ
वाच ॥ यदि पश्चान्महादेवी जघान महिषासुरं । कथं पूर्वं भद्रकाली. उग्रा हन्महिषासुरं ॥ तथा हि ॥ राम: ॥
दर्शनेन तस्याः पादाक्रान्तांस्त्ववासवं ॥ हृदि शूलेन निर्भिन्नं ददृशुः सकलाः सुराः ॥ एवं त्वं संशयं ॥ १७५ ॥

छिन्धिसुनिश्चेष्ट ममाधुना॥ ॥ऋषिरुवाच॥ श्रृणुत्वंनृपयत्राहूत भद्रकालीयथापुरा
॥प्रादुर्भूता महामाया महिषेण सहैवतु॥ महिषासुर एवासौ निद्रायां निशि पूर्वतः॥ स्वप्नन्तु
ददृशे वीरो दारुणं घोरदर्शनं॥ महामाया भद्रकाली छित्वा खड्गेन मे शिरः॥ पपौनस्यवरस्नोः
नि व्यादितास्यनिभीषणा॥ ततः प्रातर्नृपसुतः सदेव्या महिषासुरः॥ तामेव पूजयामास सुवि
रंसानुगान्तथा॥ आराधिता तदा देवी महिषेणासुरेण वै। प्रादुर्भूता भद्रकाली भुजैः षोडशभि
र्युता॥ ततः प्रणम्य महिषो महामाया जगन्मयीं। उवाचेदं वचो नम्रमूर्त्तिर्नतिस्तुतोसुरः॥ ॥
महिषउवाच॥ देवी खड्गेन संछिन्धि श्रीनि तानि शिरो मम। त्वया भुक्तानि दृष्टानि मया स्वप्नेन
निश्चितं॥ अवश्यं न तत्त्वया कार्यं मया ज्ञातं प्रमानतः। एतद्रुधिरपानं मे तत्रैकं देहि मे वरं॥ व
ध्यान्त्वयाहं मात्रातिसंशयः परमेश्वरी॥ मयापि तत्र नो दुःखं नीयतिः केन लंघ्यते॥ किन्तु त्वये
वसहितः शंभुराराधितः सदा॥ मम पित्रा मदर्थेन गतः पश्चाद्धतस्ततः॥ मयाप्याराधितः शंभुः
प्राप्तास्तेनास्तथा विधाः॥ मन्वन्तरत्रयं यावदीश्वरं राज्यमुत्तमं॥ अकंटकं मयाभुक्ता मनुनापा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नु

न विद्यते। कात्यायनेन मुनिना शप्ताहं शिष्यकारणात्॥ शिमन्तिनी विनाशं तु करिष्यति न संशयः
॥पुरा मुनितपस्यन्तं सौदास्य नाम सत्तमं॥ मुनेः कात्यायनस्याख्या शिष्यं हिमवदन्तिके। दीव्यस्त्रीः
रूपमनं कृत्वाहं कौतुकात्तदा॥ मया सम्भाषितो विप्रो त्यक्त्वा मूढ सदा तपः। नद्दू शान्तसंस्थितेना
हं मुनिना कात्यसूनुना। ज्ञात्वा माया तदा शप्तः शिष्यार्थे क्रोधसंज्ञिना। यस्मात्त्वया मे शिष्योयं मोहित
स्तपसश्च्युतः॥ कृतस्त्वया स्त्रीरूपेण तं त्वां स्त्री मिह निष्यति॥ इति माशापत्रवान् पूर्वं मुनिकात्यायनःपुनः
॥तस्य शापस्य कालोयमागत्य समुपस्थितः॥ देवेन्द्र त्वं मया प्राप्तं भुक्तं त्रिभुवनं समं। किञ्चिन्नशोच्य
मेवास्ति वाञ्छनीयं हि यन्मया तस्मात्त्वं विप्रसन्नोहं प्रार्थ्यशेषं हि यन्मम। तद्देहि दुर्गे त्वं नूयां देहित्तु
ल्यं नमो नमः॥ ॥श्रीदेव्युवाच॥ प्रार्थनीयो वरो यस्ते तं वृणु त्वं महासुर। दास्यामि ते वरं प्रोर्थ्यं स
शयो नात्र विद्यते॥ ॥महिष उवाच॥ यत्र नागा न हन्तौ तु भिक्षामि त्वत्प्रसादतः॥ यथा यज्ञेषु सर्वे
षु पूज्योहं स्यां तथा सुर। त्वत्पादसेवा न त्यक्ष्या यावत्सूर्यः प्रवर्तते। एवं वरद्वयं देवि यदि देयं ममास्ति ॥रामः॥
वे॥ ॥देव्युवाच॥ यज्ञभागाः सुरेभ्यस्तु कल्पिता वै पृथक् पृथक्। भागान विघ्नाते वा नो यद्दास्यामि ॥१७६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तदाधुना॥ किन्तु त्वयि मया युद्धे निहते महिषासुर। नैव त्यक्ष्यामि मत्पादं सततं नात्र संशयः॥ मम पुवर्त्ति
नेपूजा यत्र यत्र च तत्र ते। पूज्यास्थ चिन्त्य तत्रैव कार्या यत्त्वदानव॥ इति श्रुत्वा वचस्तस्याः प्रत्युचे महिषा
सुरः वरं प्राप्य हृष्टमुदितः प्रसन्नवदनस्तदा॥ उग्रचण्डे भद्रकालि दुर्गे देवि नमोस्तु ते। यस्तु तामूर्त्तयो दे
वि भवत्या सकलाम्बिका॥ कामिस्तामूर्त्तिभिः पूज्यो मदेहं परमेश्वरी। तन्ममाचक्ष्व यदि मे भवत्येह कृपा
कृता॥ ॥देव्युवाच॥ यानि नामानि चोक्तानि त्वयेह महिषासुर। तासु मूर्त्तिषु संपृष्टं पूज्यकोवा भविष्य
ति॥ उग्रचण्डेति या मूर्त्ति भद्रकाली त्वहं पुनः। मया मूर्त्या त्वहं निष्ये सा दुर्गेति प्रकीर्त्तिता॥ एतासु मूर्त्तिषु
सदा पादलग्नो नृणां भवान्। पूज्यो भवविष्यति त्वं स्वै देवानामपि रक्षसां॥ आदिसृष्ट्या तु उग्रचण्डा मूर्त्या त्वं
निहतः पुरा। द्वितीयसृष्टौ तु भवान् भद्रकाल्या महायाहतः॥ दुर्गारूपेण अधुना त्वां हनिष्यामि सहानुगं।
किन्तु पूर्वं न गृह्णीत स्वं मया पादयोस्तले॥ अधुना प्रार्थितं वरो गृहीतः पूर्वकाययोः॥ गृहीतवाश्च पः
श्चान्त्वं यज्ञभागोय जुनोये॥ इत्युक्त्वा सा महामाया उग्रचण्डा स्वयान्ततु। दर्शयामास सत्र तदा महिषायासु
रायवै॥ या मूर्त्तिः षोडशभुजा भद्रकालीति विश्रुता। तथैव मूर्त्ति वा न्या मपरा त्या नु विजगती॥ दश

॥का०पु०॥
॥१७७॥

णेन गदां वामे पानिनापानपात्रकं ॥ सुरापूर्णञ्च शिरसा मण्डलानां विलेहायं ॥ भिन्नाञ्जनचयप्रख्या प्रव
ण्ड सिंहवाहिनी ॥ २ केनेत्रा न नामाया युक्ता ष्टादशबाहुभिः ॥ २ उग्रचण्डेति कालीदेव्या मूर्त्तिद्वयं तथा
। माहिषः प्राप नामा दृष्ट्वा विस्मयमागतः ॥ ततो यथा यदा क्रम्य निहतो महिषासुरः ॥ तथैव जगृहे पाद
तले देवि द्वयं तु तं ॥ हृदि शूलेन निर्भिन्नं महिषं विशिरस्करं ॥ गृहीत केशां देव्या तु निर्यदन्त्र विभूषितं ॥
नियतं कं मया कार्य दृष्ट्वा पूर्व्वं तनुं स्वयं । तयं पाप्यासुरः सोषु क्षुब्धो बाष्पं मुमोह च ॥ ततस्तं क्षणमात्मा
नं संस्तुत्य स च दानवः । प्रणम्य वचनं देवी मीद माह सगद्गदं ॥ ॥महिष उवाच॥ यदि देवी प्रसन्नासि
यत्र भागास्त्र कल्पितः । तदा मे मान्यदा सा ल्व, मेवमेतद्भवेन्न हि ॥ यथाहं न सुरैः सार्द्धं करिष्ये वरमद्भुतं
। तथा मां कुरुषे देवी नजन्म फलतेयया ॥ ॥देव्युवाच॥ आराधितो हं भवता वरो दत्तो मया न च । वध्य
स्त्वं ममेवेह नात्र कार्या विचारणा ॥ युद्धस्त्र प्रार्थितं वापि सर्व्वैः सुरगणैः सह । विरोधी से सदा साम्प्र
दितिवापि न विध्यति ॥ यस्माद नलसंस्पर्शी शरीरं तव दानव । यज्ञभागोपभोगाय विशीर्णं न च विध्यति ॥ ॥रामः॥
प्राणांस्त्यक्त्वा तु महिषी सर्व्व एव महासुरः ॥ तव वीजात्मजिः प्राणांस्त्यक्त्वा वीजमहासुरः ॥ हरस्य पादसं ॥१७७॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

योगो चिरं स्थास्यति केवलां॥ कल्पकोटिसहस्राणि विंशति महिषासुरः॥ सुतानि वाह्यावन्त्यानि जन्मतेन
न विष्यति॥ इति देवी वरं दत्वा महिषायासुराय वै॥ प्रणतानेन शिरसा तत्रैवान्तरधीयत॥ महिषापिनि
जं स्थानं मायया मोहितं पुनः॥ माययावासुरं नाव आदायन्न पूर्ववत्॥ ॥सगरउवाच॥ अनेकनिह
तादैत्या मायया लोकभूतये। ननेपुनः प्रगृहीता तेन्यो दत्वा वरानतः॥ केनकीर्वा रणेनायं प्रगृहीतो दं
वरान्कथं। दत्वा तस्मै समोवक्त मम संशयं द्विजोत्तम॥ ॥और्वउवाच॥ आराधितो महादेवो रंभेनतु
रवैरिणा॥ चिरेणासवसुप्रीत स्तपसा तस्य शंकरः॥ अथ तुष्टो महादेव प्रत्यक्षं वरमुक्तवान्॥ प्रीतोः
स्मि ते वरं रंभ वरयस्व यथेप्सितं॥ एवमुक्तः प्रत्युवाच रंभस्तं चन्द्रशेखरं॥ अपुत्रोहं महादेव यदि ते
मय्यनुग्रहः॥ मम जन्मत्रये पुत्रो भवान्भवतु शंकर॥ अवध्यः सर्वभूतानां जेता च त्रिदिवोकसां॥ वि
रायुस्त्व यशस्वी च लक्ष्मीवान्सत्यशांकरः॥ एवमुक्तस्तु देवेन प्रत्युवाच वृषध्वजः॥ नवेद्वेन तथा किन्त
न्ते न विघ्नामि सुतस्तव॥ इत्युक्त्वा स तदा देव स्तत्रैवान्तरधीयत॥ रंभोपि यातः स्वस्थानं हर्षोत्फुल्ल
विलोचनः॥ पथि गच्छन्स रंभोथ ददर्शो महिषीं शुभां॥ त्रिहायणीं चित्रवर्णा सुन्दरीमृतुगामिनीं॥ सतां

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

का०पु०
१७८

दृष्ट्वा तु महिषीं रम्भः कामेन मोहितः ॥ दोर्भ्यां गृहीत्वा वनदा चकार सुरतोत्सवं ॥ द्वयोः प्रवृत्ते सुरते त
दासात्तस्य तेजसा ॥ दधार महिषी गर्भं तस्मात् महिषासुरः ॥ तस्यां स्वर्गेन गिरिश स्तत्पुत्त्रं मवाप्नवान्
॥ वढ्ढे वेस तदा वाग्निः शुक्लपक्षे समुद्भवः ॥ तेन्त्र कात्यायनमुनिः शप्तवान् महिषासुरं ॥ दुर्मर्यं वी
क्ष्याश्रिष्ट्य शिष्यानुग्रहकामतः ॥ कात्यायनेन स्त्रीमूत्तु विज्ञाय महिषासुरं । प्रारुप्राणीय पूर्वन्तु स्रपितका
ध्या४ चन्द्रशेखरः ॥ ॥ ईश्वर उवाच ॥ देवि कात्यायनेनायं शप्तोऽयं महिषासुरः । योषि द्धिनाशकर्त्तातेन
विति निजगन्मयी ॥ निःसंशयं मुनेर्वाक्यं न विष्यति नसंशयः ॥ मदीया महिषः कायस्त्वया देवि जगन्म
यि ॥ हन्तव्यः सततं योगयुक्तपूर्वपरेपिच ॥ हरिर्हरिस्वरूपेण त्वया वै दुःसमयुना ॥ मयायं महिषः
कायस्तावद्वा रामविष्यति ॥ इति पूर्वं महादेवो देवीं प्रार्थितवान् पुरा ॥ तेन देवी महादेवं जयाह महिषासुर
। त्रिभुजन्मसु पुत्रोयं रंभस्य भगवान् हरः ॥ सच्छित्रयं सरं गोपरंतरेव वा जायते ॥ सुन्दरस्ताद्दशांतप
तपः परमदारुणां ॥ तथैवाराधितः शम्भुः पुत्रार्थे प्रददौ वरं । तथैव महिषी तेजे प्रथमं सुरतोत्सवं ॥ ॥रामः॥
तस्यास्तथा भवद्वीरो दानवो महिषासुरः तथैवते पे भगवान्मुनिः कात्यायनस्सुत ॥ इति प्रवृत्ते पूर्वस्मि ॥१७८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यरस्मिंस्तु जन्मनि। महिषः पूजयित्वाथ देवीं वरमयाचत॥ तृतीये जन्मनि व्रतं प्राप्य कल्यानद्योषत
ःनेहमेजन्मनवछिन्नेत्येवं वरमयाचत॥ तेन देवीपादतले तिष्ठत्येवासुराधुना॥ नोन्मत्तिरपि तस्याः
न्ति सम्वर्त्तान्तानन्तादपि॥ एवं देवीप्रसादेन महादेवांशसंभवः। परामवाप्य सन्ततं प्रतिपत्तिमह
सुरः॥ इति ते कथितं राजन् यथा हि महिषासुरः॥ देवीपादतलं प्राप्य यथा सोद्य प्रमोदते॥ प्रस्तुतं
शृणु नेत्र राजन् कथयामि नृपोत्तम॥ ॥श्रीमार्कण्डेय उवाच॥ इति वः कथितं तेन राजा स सगरो
यथा॥ श्रीदेव्याश्चक्रे संवादं देवीमहिषयोर्जने॥ पुनर्यथाह भूपाय सगराय महात्मने॥ तच्छृणुष्व तु मुः
निःशेषात्तु स्वायुष्यनरं परं॥ ॥इति श्रीकालिकापुराणे नवपञ्चाशोऽध्यायः॥ ५९॥ ॥ ॥
॥श्रीमार्कण्डेय उवाच॥ यथाह भगवान् देवो भैरवाय महात्मने॥ वेतालाय च पृष्टस्तथा त्वं प्रस्तुतं शृणु॥॥
॥ ॥श्रीभगवानुवाच॥ उग्रचण्डेति या मूर्त्तिरष्टादशभुजा भवेत्॥ सा रदस्यां पुराकल्पे पक्षे कन्याः
आषाढस्येतु पूर्णायां सत्रं द्वादशवार्षिकं
गते रवौ॥ प्रादुर्भूता महाभागा योगिनीकोटिभिः सह॥ ततो हं नेहं नत्विन दक्षस्य सुमहात्मना॥ कपालीति स
दक्षः कर्त्तुं समारेभे कृता सर्व्वे दिवौकसः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥का०पु०॥
॥१७९॥

नीचापि नज्ञायेनिरूपनाहृता॥ ततोरोषसमायुक्ता प्राणांस्तत्याजसासती॥ त्यक्तदेहासतीचापिचाद्यमूर्त्ति
स्तदाभवत्॥ ततःप्रभृत्यशेपि तस्मिन्वादश्यवार्षिके॥ नवम्यांकृष्णपक्षस्यकन्यायास्त्वाद्यमूर्त्तिधृक्॥
आगनिजामहामाया योगिनीकोटिभिःसह॥ सतीरूपंपरित्यज्य यज्ञभङ्गमथाकरोत्॥ शंकरस्यग
णैःसर्वैःसहिताशंकरेणच॥ ध्वस्तंवतंजसादेवी महासत्त्वंमहात्मनः॥ ततोदेव्यामहाक्रोधे व्यतीते
त्रिदिवौकसः॥ पूजायांचक्रुरतुलां देवीपूर्वोदितेनवै॥ पूर्वोदितविधानेन पूजामस्यादिवौकसः॥ कृ
त्वैवपरमामापु र्निर्वृतिंदुखहानये॥ एवमन्यैरपिसदा कार्यदेव्याःप्रपूजनं॥ विभूतिमतुलांप्रा
प्नुस्तुतुर्वर्गप्रदायिकां॥ योमोहादथवालस्याद्देवींदुर्गांमहोत्सवे॥ नपूजयतिदुष्टत्वाद्द्वेषादप्यथ
भैरवः॥ क्रुद्धाभगवतीतस्य कामानिष्टान्निहन्तिवै॥ परत्रचमहामाया यावलिर्भूत्वासजायते॥ अष्टम्यांरु
धिरैर्मांसैर्महामांसैःसुगन्धिभिः॥ पूजयेद्बहुजातीयैर्बलिभिर्भोजनैःशिवां॥ सिंदूरैःपट्टवासैश्च
नानाविधविलेपनैः॥ पुष्पैरनेकजातीयैःफलैर्बहुविधैरपि॥ उपवासेमहाष्टम्यां पुत्रवान्नसमाचरे
त्॥ यथातथैवपूतात्मा सतीदेवींप्रपूजयेत्॥ पूजयित्वामहाष्टम्यां नवम्यांमुनिभिःसदा॥ विसर्जयेद्दश

॥रामः॥
॥१७९॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म्यां तु दशमे साधकोत्सवे॥ अन्तपादे दिवा नागे श्रवणास्य यदा भवेत्॥ तदा संप्रेक्षणं देव्या दशम्यां
साधकोत्सवैः॥ वाणिनीभिः कुमारीभिः वेश्याभिर्नटनर्तकैः॥ शंखतूर्यनिनादैश्च मृदङ्गैः पटहै
स्तथा॥ ध्वजैर्वस्त्रैर्बहुविधैः लाजापुष्पप्रकीर्णकैः॥ धूलिकर्द्दमविक्षेपैः क्रीडाकौतुकमंगलैः॥ भगलि
ङ्गाभिधानैश्च भगलिङ्गप्रगीतकैः॥ भगलिङ्गादिशब्दैश्च प्रीनयेत्सुरसंजनाः॥ परेनाक्षिप्यते यस्तु
सः परं नाक्षिपत्यपि॥ क्रुद्धा भगवती तस्य शापं दद्यात्सुदारुणं॥ आदित्यादौ निशा नागे श्रवणास्यय
दा भवेत्॥ तदा देव्याः समुत्थानं नवम्यां तु पुनर्दिवा॥ अन्तपादे निशा नागे श्रवणास्य यदा भवेत्ः॥
तदा देव्याः समुत्थानं नवम्यां तु पुनर्दिवाः॥ विसर्जनमनेनैव मन्त्रेणावत्स भैरव॥ कर्तव्यमग्रत
सिद्ध्यर्था विसर्जयच्च विभूतये॥ उत्तिष्ठ देवि चण्डेशि शुभां पूजां प्रगृह्य च॥ कुरुष्व मम कल्याणम
ष्टसिद्धिभिः सह॥ गच्छ गच्छ परं स्थानं स्वस्थानं देवि चण्डिके॥ यन्मया पूजितं मया तु त्वं परिपूर्णं तद
स्तु मे॥ व्रज त्वं स्रोतसि जले तिष्ठ गेहे तु भूतये॥ निमज्यां तत्र सिसे त्यज्य पवित्रकावर्जितजले॥ पुत्रायुर्द्ध
नवृद्ध्यर्थं स्थापितासि जले मया॥ इत्यनेन तु मन्त्रेण देवीं संस्थापयेज्जले॥ सर्वलोकहिताय सर्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लोकविश्रुतये॥ दुर्गान्तन्त्रेण मन्त्रेण पूजितश्चण्डलेश्वापि॥ भद्रकाली उग्रचण्डा महामाया महोत्सवे॥ नेत्र
वीजन्तु सर्व्वेषां पूजने परिकीर्त्तितं॥ योगिनीनान्तु सर्व्वासां मूलमूर्त्तिस्तथैव च॥ तन्त्रं तथोग्रचण्डायाः पृ
थक्त्वं शृणु भैरव॥ आद्यहृदयं नेत्रवीजं मन्त्रस्यापान्तमन्तरे॥ वह्निनान्तस्वरेणेन्दु विन्दुनादेन चमाय
कं॥ नेत्रवीजं द्वितीयन्तु द्विधा वर्त्तिनमुच्यते॥ भद्रकाल्यास्तु मन्त्रोयं धर्म्मकामार्थसाधने॥ यदा तु वैष्णवी
देवी महामाया जगन्मयी॥ पूज्यते वैष्णवी देवी तन्त्रेनाष्ट योगिनी॥ ताः प्रोक्ताः स्थलपुज्यायाः पूर्व्वं कीर्त्ति
ता भैरव॥ उग्रचण्डादयस्त्वाष्टौ दुर्गान्तन्त्रस्य कीर्त्तिताः॥ भद्रकाल्यास्तु मन्त्रेण भद्रकालीं प्रपूजयेत्॥ पूजये
न्मूर्त्तिरष्टार्थमेता एवाष्ट योगिनी॥ जयन्तीं मङ्गलां कालीं तथा चैव कपालिनीं॥ दुर्गां शिवां क्षमां धात्रीं दलेषु
ष्टसु पूजयेत्॥ यदोग्रचण्डातन्त्रेण सा देवी तत्र पूजयेत्॥ योगिनी तत्र पूजास्तु अष्टावन्यास्तु भैरव॥ कोटि
कीशी वह्नितीश्च तथा हेमवतीश्वरी॥ शाकंभरी च दुर्गा च सप्तमी च महोदरी॥ उमायाः सौम्यमूर्त्तिस्तु सत
तं शृणु भैरव॥ पादैः समाप्तिसहितः फडन्तो नन्त एव च॥ एकाक्षरश्चाक्षरस्य उमातन्त्रेरितस्मृतः॥ सु
वर्ण्णसदृशीं गौरीं भुजद्वयसमन्वितां॥ नीलारविन्दं वामेन पाणिना विभ्रतीं सदा॥ शुक्लन्तु चामरं धृत्वाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नर्गस्यांगेथदक्षिणोविन्यस्यदक्षिणांहस्तांतिष्टन्तींपरिचिन्तयेत्॥विनापिमातास्तुजाणीनकस्तुपरि
चिन्तयेत्॥द्विभुजांस्वर्णगौराङ्गीं पद्मचामरधारिणीं॥व्याघ्रचर्मस्थितापद्म पद्मासनगतासती॥ए
तस्याःपूजनेप्रोक्ता अष्टौवेतालभैरव॥योगिन्योनायिकाश्चापि पृथग्जनक्रियोचतः॥जयाचविज
यावैव मातंगीललितातथा॥नारायणीचसावित्री स्वाहास्वधातथाष्टमी॥पूर्वंशुंभनिशुम्भस्य दान
वाभ्रातरौतथा॥वेद्भूवतुर्महाकायौ महासत्त्वौमहावलौ॥अन्धकस्यसुतौचोभु दन्तिनाविकटद्र्मदौ॥
मयापिनिहतेतस्मिन्नन्धकोख्यमहासुरः ससैन्यवाहनौतौतु पातालतलमाश्रितौ॥ततस्तस्मात्तपश्ची
र्त्वं ब्रह्माणंनौमहासुरौ॥समाकृतुप्रीतसंयुक्तौ सप्रसन्नौ वरंददौ॥तौब्रह्मवरदृप्तौतु समासाद्यजग
त्त्रयं॥इन्द्रत्वमकरोच्छुम्भस्त्वन्तत्वंचनिशुम्भकः॥सर्वेषामेवदेवानां यज्ञभागानपाहरन्॥स्वयंशुम्भो
निशुम्भश्च दिक्पालत्वं तथाकरोत्॥सर्वेसुरगणाःसेन्द्रास्ततोगत्वाहिमाचलं॥गंगावतारनिकटेः
महामायांप्रतुष्टवुः॥अनेकधाःतदादेवी तदासर्वामरोत्कटेः॥मातंगवनितामूर्तिर्भूत्वादेवानए
च्छत॥युष्माभिरमरैरुद्र स्तूयतेकात्रकाविनी॥किमर्थमागतायूयं मातंगस्याश्रमंप्रति॥इतिब्रु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वन्ना मातंग्यास्तस्यास्तन्वा यकोशतः ॥ समुद्भूता वदी देवी मां स्तुवन्ति सुराइति ॥ शुंभो निशुंभोसुर
रौ बाधते सकलान्सुरान् ॥ तस्मात्तयोर्वधायाहं स्तूयेद्य सकलैः सुरैः ॥ विनिःसृता यान्देव्यास्तु मा
तङ्गीकायतस्तदा ॥ भिन्नाञ्जननिभा कृष्णा सा मूर्त्ताचरीक्षणादपि ॥ कालिकाख्या न वन्नापि हिमाचल
तलेन्नात्रया ॥ तामुग्रतारामृषयो वदन्ती हमनीषिणः ॥ उग्रादपि भयात्त्राति यस्माद्भक्तान्सदाम्बिका
॥ एतस्याः प्रथमं बीजं कथितं तन्त्रमेव च ॥ एषैवैकजटाख्यातु यस्मात्तस्याज्जटैकिका ॥ शृणु तत
स्याच्चर्चनं वक्ष्ये सम्यग्वेतालभैरवौ ॥ यथाध्यात्वा महादेवीं नरः प्राप्नोत्यभीप्सितं ॥ चतुर्भुजां कृष्णवर्णां मु
ण्डमालाविभूषणां ॥ खड्गं दक्षिणपाणिभ्यां बिभ्रतीन्दीवरं तु यः ॥ कर्त्तरी खर्प्परंचैव क्रमाद्वामेन बिभ्
रतीं ॥ द्यां लिखन्तीं जटामेकां बिभ्रतीं शिरसा स्वयं ॥ मुण्डमालाधरा शीर्षे ग्रीवायामपि सर्वदा ॥ वक्ष
सा नागहारन्तु बिभ्रतीं रक्तलोचनां ॥ कृष्णवस्त्रधरां कट्यां व्याघ्राजिनसमन्विता ॥ वामपादं शवहृदि
संस्थाप्य पाददक्षिणं ॥ विन्यस्य सिंहपृष्ठे तु लेलिहानाशवं स्वयं ॥ साट्टहासमहाघोररावयुक्ता विभ् ॥ राम ॥
रीषणा ॥ चिन्त्योग्रतारा सततं नक्तिमद्भिः सुरेश्वरैः ॥ तस्याः संप्रवक्ष्यामि याष्टौ योगिनिसंस्थिताः ॥ १८१ ॥
वै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ महाकाल्याष्टरुद्राणि उग्राणि मातथैव च ॥ घोरा च ब्राम्हरी चैव महारात्रीश्च सप्तमी ॥ भैरवी चाष्टमी प्रो
क्ता योगिनीनां प्रपूजयेत् ॥ या कायकोषाद्दुर्गा पार्वत्याश्च वै भैरव ॥ सा कौशिकीति विख्याता चारुरू
पा मनोहरा ॥ निःसृत्य हृदये देव्या रसनायैन चण्डिका ॥ न तस्याः सदृशी मूर्त्या चारुरूपेन विद्यते ॥ त्रि
षु लोकेषु कान्त्या वा नास्यास्तुल्या न विद्यति ॥ योगनिद्रा महामाया या मूलप्रकृतिः स्मृता ॥ तस्याः प्रा
णाख्यरूपेयं देवी या कौशिकी तथा ॥ तन्त्रबीजं तथैव स्या बीजन्तु परिकीर्त्तितं ॥ तन्त्रं तस्यास्तु वक्ष्यामि
सर्वकामप्रदं नृणां ॥ समाप्तिनान्त्यदन्त्यन्ते षष्ठवर्णादि बिन्दुना ॥ षट्स्वरेण संसृष्टं बिन्दुन्यास समलं
कृतः ॥ कौशिकीतन्त्रमन्त्रोयं धर्मकामार्थसाधकः ॥ एतत्तस्याः संप्रवक्ष्यामि मूर्त्तिरूपञ्च भैरव ॥ शृणुष्वे
कमना भूत्वा जगदाह्लादकाटिकां ॥ धम्मिल्लसंयतकचां विघोवीचीमुखीकलां ॥ केशान्ते तिलकस्याः
र्द्धं दधतीं सुमनोहरां ॥ मणिकुण्डलसंघृष्टगण्डां मुकुटमण्डितां ॥ संजपोनिः कर्णपूराभ्यां कर्णमा
पूर्यसंगतां ॥ सुवर्णमणिमालिका नागहारविराजितां ॥ सद्भसुगन्धिभिः पुष्पै रत्नानैरतिसुन्दरीं
॥ मालाविलम्बितग्रीवायां रत्नकेयूरधारिणीं ॥ मृणालायतवृत्तैस्तु बाहुभिः कोमलैः शुभैः ॥ राजन्तीं

कंचुकोपेत पीनोन्नतपयोधरां ॥ क्षीणमध्या पीनवक्त्रा त्रिवलीभुजभूषिता ॥ स्थूलं वज्रं च बाणांश्च खड्गं
शक्तिं तथैव च ॥ दक्षिणैः पाणिभिर्द्देवी गृहीत्वाऽतिविराजिता ॥ गदां घण्टां च चापं च चर्म्म चाक्तिं तथैव च
च ॥ ऊर्द्ध्वादिक्रमतो देवी दधती वामबाहुभिः ॥ सिंहस्योपरि तिष्ठन्ती व्याघ्रचर्म्माणि कौशिकी ॥ विभ्रती रू
पमतुलं सशुरासुरमोहिनी ॥ एतस्याः शृणु वत्सत्वं या पूज्याश्चाष्टयोगिनीः ॥ ताः पूजिताश्च कुर्वन्ति चतु
र्वर्ग्गं नृणां सदा ॥ ब्रह्माणी प्रथमा प्रोक्ता ततो माहेश्वरी परा ॥ कौमारी वैष्णवी चैव वाराही पञ्चमी तथा ॥ ना
रसिंही तथैवैन्द्री शिवदूती तथाष्टमी ॥ एताः पूज्या महालागा योगिनी कामदायिनी ॥ दिव्याललाटान्निः
क्रान्ता या कालीति च विश्रुता ॥ तस्यास्तत्त्वं प्रवक्ष्यामि क्रामदं शृणु भैरव ॥ समाप्तिसहितो दन्त्यः प्रान्तस्तस्मा
त्पुरः सरः ॥ षष्ठस्वरान्वितविन्द्वेन्दुसहितो नादिरेव च ॥ कालीतत्त्वमिति प्रोक्तं धर्म्मकामार्थसाधकं ॥ एतां मू
र्त्तिं प्रवक्ष्यामि वत्सैकाग्रमनाः शृणु ॥ नीलोत्पलदलप्रख्या चतुर्बाहुसमन्विता ॥ खट्वांगचन्द्रहासञ्च
बिभ्रती दक्षिणे करे ॥ वामे चर्म्म च पाशञ्च ऊर्द्ध्वाधो नायतः पुनः ॥ दधती मुण्डमालाञ्च व्याघ्रचर्म्मधराम्बरा ॥ रामः ॥
॥ कृशांगी दीर्घदंष्ट्रा च अतिदीर्घातिभीषणा ॥ लोलजिह्वा निम्नरक्तनयना नादभीषणा ॥ कवचञ्च वाहना: ॥ १८२ ॥

मीन् विस्तारश्चवर्णनता॥ एषा नारास्या देवी चामुण्डेति विगीयते॥ एतस्या योगिनीचाष्टौ पूजयेद्विन
येद्यति॥ त्रिपुरान्तीघण्टा चण्डी कर्त्तहस्ता विधात्रिका॥ करालाशूलिनीचेति अष्टौताः परिकीर्त्तिताः॥
एषाति कामदा देवी जाग्रहानीकरी सदा॥ एतस्याः अष्टमी काचित् कामदा न हि विद्यते॥ कोटिक्या
हृदयाद्देवी निःसृता ध्यायते गुरोः॥ शिवदूती समाख्याता यावद्देवमानेर्दृता॥ मन्त्रमस्याः प्रवक्ष्या
मि धर्म्मकामार्थदायकं॥ यत्कृत्वा साधको याति दुर्लभं शिवमन्दिरे॥ येनाराध्य महादेवीं शिवदूतीं
शिवात्मिकां॥ न विरा सलते कामान्नरः सर्व्वजयी भवेत्॥ अनन्तः समाप्तिसहितो विन्दुत्यान्दद्यावरा
स्वरेणायान्त्यदन्तेन स्थेशोअन्ते न पूर्वयोः॥ सरवं विन्दुयुगलं पूर्वस्थो यान्तपावकः॥ षष्ठः स्वरकला
शून्यैः संस्थितः प्रथमस्थितः॥ नवोयं शिवदूत्यास्ता शिवदूतीजयप्रदा॥ रूपमस्याः प्रवक्ष्यामि शृ
णु वैसैकतन्मनः॥ चतुर्भुजां महाकायां सिंदूरसदृशद्युतिं॥ रक्तदन्तं मुण्डमालां जटाजूटार्द्धचन्द्र
कं॥ नागकुण्डलहारान्यां शोभितं नखरोज्वलं॥ व्याघ्रचर्म्मपरिधानं दक्षिणे शूलखड्गधृक्॥ वामे
पात्रं तथा मुण्डं विपदूर्ध्वपराक्रमान्॥ स्थूलवक्त्रा च पीनोष्ठं तुङ्गमूर्त्तिं भयंकरं। निक्षिप्य दक्षिणं पादं

वै।

संतिष्ठन्तु नैवोपरि ॥ वामपादं स्रकालस्य पृष्ठे फेरुस्थो तेर्हनं ॥ ईदृशां शिवदूत्यास्तु मूर्त्तिं ध्यायेद्विभूतये ॥
ध्यानमात्रान्तथैतस्या नरः कल्याणमाप्नुयात् ॥ पूजनाद्दाचिराद्देवी सर्व्वान्कामान्ददातिच ॥ यः शिवाविरु
तं श्रुत्वा शिवदूतीं शुभंप्रदां ॥ प्रणमेत्साधको नक्ता तस्य कामा करेस्थिता ॥ यदाजय्यानजगतां रक्तवीजं
हितायवै ॥ महादेवीमहामाया तदस्याः कायतः स्मृताः ॥ दूतं प्रस्थापयामास शिवं शुम्भाय साम्वि
का ॥ तेन सा शिवदूतीति देवैः सर्व्वैः प्रगीयते ॥ क्षेमङ्करी चय्यान्ताच वेदमाता महोदरी ॥ भवानीका
मदा देवी भगस्या भगमालिनी ॥ भगोदरी भगावाहा भगाजिह्वा भगा तथा ॥ एतद्द्वादशयोगिन्यः पूजने
परिकीर्त्तिता ॥ एताद्वादश योगिन्यः शिवदूत्याः सदैव हि ॥ विचरन्ती स्वयं देवी यत्र तत्रैव गच्छति
॥ योगिन्यो ह्यथ संख्याः स्यु यथान्यासां तथा पुनः ॥ चण्डिकायास्तु योगिन्यः संख्यात्र परिकीर्त्तिता ॥ इति
वो नु क्रमन्त्राणि कथितानि समन्ततः ॥ कामाख्याया स्वमाहात्म्यं कल्पं तत्त्वं वदामिनो ॥ ॥ इति
श्रीकालिकापुराणोउत्तरतन्त्रे षष्टितमोध्यायः ॥ ६० ॥ ॥ श्रीभगवानुवाच ॥ कामात्मना
गता यस्मान्मया सार्द्धं महागिरौ ॥ कामाख्या प्रोच्यते देवी नीलकूटे रहोगता ॥ कामदा कामिनी कामाः

कान्ता कामाङ्गदायिनी॥ कामाङ्गनाशिनी यस्मात् कामाख्या तेन चोच्यते॥ एतस्याः स्वरूपमाख्यातं का
माख्याया विशेषतः॥ या सा प्रकृतिरूपेण जगत्स्वात्मनि योजयेत्॥ मधुकैटभनाशाय महामायाङ्ग
विमोहितः॥ यदा संसुप्तो विष्णुस्तदेषा मोहयेद्धरिं॥ दैनन्दिने तु प्रलये सुषुप्ते गरुडध्वजे॥
तस्य श्रवणाद्विजातौ असुरौ मधुकैटभौ॥ कूर्मपृष्ठे स्थिता देवी विश्वमाधाव तदा जले॥ तां विली
नां योगनिद्रां महामायां व्यलोकयत्॥ तां वै दृष्ट्वा तदा पृथ्वी कम्पिता देवेश्वरी॥ उमायाश्चिन्तया
मास कथं पृथ्वी भवेद्दृढा॥ इदानीं सा सर्वं पृथ्वी प्रवृत्ता कोमले जले॥ सृष्टिकाले जलात्तोतुं कथं
शक्ता न विद्मसि॥ इति संचिन्त्य सा माता जगतां सृष्टिरूपिणी॥ उपगम्य तदा विष्णुं मा ससाद सुः
निद्रितं॥ तं तु सुप्तं समासाद्य जगन्नाथं जगत्पतिं॥ वामहस्तं करेत्याय तस्य कर्णे निवेशयत्॥
निवेश्य नखराग्रेण प्रोज्जूतं श्रवणामलं॥ कूर्मविकारसा देवी योगनिद्रा जगत्प्रसूः॥ तत्कर्णमले
कूर्मसंस्थो मधुनामासुरो भवेत्॥ ततो दक्षिणहस्तस्य कनिष्ठायं तु दक्षिणा॥ कर्णे निवेशये देवी तस्मा
दप्युद्भूतं मलं॥ तच्चापि पेशोदयामास करशाखाद्वयेन तु॥ ततो भूत्वा कैटभो नाम बलवानसुरो महान्

वा०उ०
१८४

॥उत्पन्नः सर्वपानार्थं यस्य मूलेऽमलान्मधुः॥ अनन्तस्य महादेवी मधुनाम करोत्तदा॥ उत्पन्नः कीट
